# ॥ વ્યાસગીતા બ્રહ્મપુરાણે ॥

.. Vyasagita from Brahma Purana ..

sanskritdocuments.org

September 11, 2017

# .. Vyasagita from Brahma Purana ..

# ॥ વ્યાસગીતા બ્રહ્મપુરાણે ॥

## Sanskrit Document Information

Text title : vyAsagItAbrahmapurANAntargataM

File name : vyAsagItAbrahmapurANa.itx

Category : gItA, giitaa

Location : doc_giitaa

Translated by : Posted at http://www.astrojyoti.com/vyasagita.htm without author reference

Description-comments : adhyAya numbering is different than

Latest update : May 6, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

अध्यायः २३४ (१२६)

આત્યન્તિકલયનિરૂપણમ્

વ્યાસ ઉવાચ

આધ્યાત્મિકાદિ ભો વિપ્રા જ્ઞાત્વા તાપત્રયં બુધઃ ।
ઉત્પન્નજ્ઞાનવૈરાગ્યઃ પ્રાપ્નોત્યાત્યન્તિકં લયમ્ ॥ ૨૩૪.૧॥

આધ્યાત્મિકોઽપિ દ્વિવિધા શારીરો માનસસ્તથા ।
શારીરો બહુભિર્ભેદૈર્ભિદ્યતે શ્રૂયતાં ચ સઃ ॥ ૨૩૪.૨॥

શિરોરોગપ્રતિશ્યાયજ્વરશૂલભગંદરૈઃ ।
ગુલ્માર્શઃશ્વયથુશ્વાસચ્છર્દ્યાદિભિરનેકધા ॥ ૨૩૪.૩॥

તથાઽક્ષિરોગાતીસારકુષ્ઠાઙ્ગામયસંજ્ઞકૈઃ ।
ભિદ્યતે દેહજસ્તાપો માનસં શ્રોતુમર્હથ ॥ ૨૩૪.૪॥

કામક્રોધભદ્વેષલોભમોહવિષાદજઃ ।
શોકાસૂયાવમાનેર્ષ્યામાત્સર્યાભિભવસ્તથા ॥ ૨૩૪.૫॥

માનસોઽપિ દ્વિજશ્રેષ્ઠાસ્તાપો ભવતિ નૈકધા ।
ઇત્યેવમાદિભિર્ભેદૈસ્તાપો હ્યાધ્યાત્મિકઃ સ્મૃતઃ ॥ ૨૩૪.૬॥

મૃગપક્ષિમનુષ્યાદ્યૈઃ પિશાચોરગરાક્ષસૈઃ ।
સરીસૃપાદ્યૈશ્ચ નૃણાં જન્યતે ચાઽઽધિભૌતિકઃ ॥ ૨૩૪.૭॥

શીતોષ્ણવાતવર્ષામ્બુવૈદ્યુતાદિસમુદ્ભવઃ ।
તાપો દ્વિજવરશ્રેષ્ઠાઃ કથ્યતે ચાઽઽધિદૈવિકઃ ॥ ૨૩૪.૮॥

ગર્ભજન્મજરાજ્ઞાનમૃત્યુનારકજં તથા ।
દુઃખં સહસ્રશો ભેદૈર્ભિદ્યતે મુનિસત્તમાઃ ॥ ૨૩૪.૯॥

સુકુમારતનુર્ગર્ભે જન્તુર્બહુમલાવૃતે ।
ઉલ્બસંવેષ્ટિતો ભગ્નપૃષ્ઠગ્રીવાસ્થિસંહતિઃ ॥ ૨૩૪.૧૦॥

અત્યમ્લકટુતીક્ષ્ણોષ્ણલવણૈર્માતૃભોજનૈઃ ।
અતિતાપિભિરત્યર્થં બાધ્યમાનોઽતિવેદનઃ ॥ ૨૩૪.૧૧॥

પ્રસારણાકુઞ્ચનાદૌ નાગા(ઙ્ગા)નાં પ્રભુરાત્મનઃ ।
શકૃન્મૂત્રમહાપઙ્કશાયી સર્વત્ર પીડિતઃ ॥ ૨૩૪.૧૨॥

નિરુચ્છ્વાસઃ સચૈતન્યઃ સ્મરઞ્જન્મશતાન્યથ ।
આસ્તે ગર્ભેઽતિદુઃખેન નિજકર્મનિબન્ધનઃ ॥ ૨૩૪.૧૩॥

જાયમાનઃ પુરીષાસૃઙ્મૂત્રશુક્રાવિલાનનઃ ।
પ્રાજાપત્યેન વાતેન પીડ્યમાનાસ્થિબન્ધનઃ ॥ ૨૩૪.૧૪॥

અધોમુખસ્તૈઃ ક્રિયતે પ્રબલૈઃ સૂતિમારુતૈઃ ।
ક્લેશૈર્નિષ્ક્રાન્તિમાપ્નોતિ જઠરાન્માતુરાતુરઃ ॥ ૨૩૪.૧૫॥

મૂર્ચ્છામવાપ્ય મહતીં સંસ્પૃષ્ટો બાહ્યવાયુના ।
વિજ્ઞાનભ્રંસમાપ્નોતિ જાતસ્તુ મુનિસત્તમાઃ ॥ ૨૩૪.૧૬॥

કણ્ટકૈરિવ તુન્નાઙ્ગઃ ક્રકચૈરિવ દારિતઃ ।
પૂતિવ્રણાન્નિપતિતો ધરણ્યાં ક્રિમિકો યથા ॥ ૨૩૪.૧૭॥

કણ્ડૂયનેઽપિ ચાશક્તઃ પરિવર્તેઽપ્યનીશ્વરઃ ।
સ્તનપાનાદિકાહારમવાપ્નોતિ પરેચ્છયા ॥ ૨૩૪.૧૮॥

અશુચિસ્રસ્તરે સુપ્તઃ કીટદંશાદિભિસ્તથા ।
ભક્ષ્યમાણોઽપિ નૈવૈષાં સમર્થો વિનિવારણે ॥ ૨૩૪.૧૯॥

જન્મદુઃખાન્યનેકાનિ જન્મનોઽનન્તરાણિ ચ ।
બાલભાવે યદાપ્નોતિ આધિભૂતાદિકાનિ ચ ॥ ૨૩૪.૨૦॥

અજ્ઞાનતમસા છન્નો મૂઢાન્તઃ કરણો નરઃ ।
ન જાનાતિ કુતઃ કોઽહં કુત્ર ગન્તા કિમાત્મકઃ ॥ ૨૩૪.૨૧॥

કેન બન્ધેન બદ્ધોઽહં કારણં કિમકારણમ્ ।
કિં કાર્યં કિમકાર્યં વા કિં વાચ્યં કિં ન ચોચ્યતે ॥ ૨૩૪.૨૨॥

કો ધર્મઃ કશ્ચ વાઽધર્મઃ કસ્મિન્વર્તેત વૈ કથમ્ ।
કિં કર્તવ્યમકર્તવ્યં કિં વા કિં ગુણદોષવત્ ॥ ૨૩૪.૨૩॥

એવં પશુસમૈર્મૂઢૈરજ્ઞાનપ્રભવં મહત્ ।
અવાપ્યતે નરૈર્દુઃખં શિશ્નોદરપરાયણૈઃ ॥ ૨૩૪.૨૪॥

અજ્ઞાનં તામસો ભાવઃ કાર્યારમ્ભપ્રવૃત્તયઃ ।
અજ્ઞાનિનાં પ્રવર્તન્તે કર્મલોપસ્તતો દ્વિજાઃ ॥ ૨૩૪.૨૫॥

નરકં કર્મણાં લોપાત્ફલમાહુર્મહર્ષયઃ ।

તસ્માદજ્ઞાનિનાં દુઃખમિહ ચામુત્ર ચોત્તમમ્ ॥ ૨૩૪.૨૬॥

જરાજર્જરદેહશ્ચ શિથિલાવયવઃ પુમાન્ ।
વિચલચ્છીર્ણદશનો વલિસ્નાયુશિરાવૃતઃ ॥ ૨૩૪.૨૭॥

દૂરપ્રનષ્ટનયનો વ્યોમાન્તર્ગતતારકઃ ।
નાસાવિવરનિર્યાતરોમપુઞ્જશ્ચલદ્વપુઃ ॥ ૨૩૪.૨૮॥

પ્રકટીભૂતસર્વાસ્થિર્નતપૃષ્ઠાસ્થિસંહતિઃ ।
ઉત્સન્નજઠરાગ્નિત્વાદલ્પાહારોલ્પચેષ્ટિતઃ ॥ ૨૩૪.૨૯॥

કૃચ્છ્રચંક્રમણોત્થાનશયનાસનચેષ્ટિતઃ ।
મન્દીભવચ્છ્રોત્રનેત્રગલલ્લાલાવિલાનનઃ ॥ ૨૩૪.૩૦॥

અનાયત્તૈઃ સમસ્તૈશ્ચ કરણૈર્મરણોન્મુખઃ ।
તત્ક્ષણેઽપ્યનુભૂતાનામસ્મર્તાઽખિલવસ્તુનામ્ ॥ ૨૩૪.૩૧॥

સકૃદુચ્ચારિતે વાક્યે સમુદ્ભૂતમહાશ્રમઃ ।
શ્વાસકાસામયાયાસસમુદ્ભૂતપ્રજાગરઃ ॥ ૨૩૪.૩૨॥

અન્યેનોત્થાપ્યતેઽન્યેન તથા સંવેશ્યતે જરી ।
ભૃત્યાત્મપુત્રદારાણામપમાનપરાકૃતઃ ॥ ૨૩૪.૩૩॥

પ્રક્ષીણાખિલશૌચશ્ચ વિહારાહારસંસ્પૃહઃ ।
હાસ્યઃ પરિજનસ્યાપિ નિર્વિણ્ણાશેષબાન્ધવઃ ॥ ૨૩૪.૩૪॥

અનુભૂતમિવાન્યસ્મિઞ્જન્મન્યાત્મવિચેષ્ટિતમ્ ।
સંસ્મરન્યૌવને દીર્ઘં નિઃશ્વસિત્યતિતાપિતઃ ॥ ૨૩૪.૩૫॥

એવમાદીનિ દુઃખાનિ જરાયામનુભૂય ચ ।
મરણે યાનિ દુઃખાનિ પ્રાપ્નોતિ શ્રૃણુ તાન્યપિ ॥ ૨૩૪.૩૬॥

શ્લથગ્રીવાઙ્ઘ્રિહસ્તોઽથ પ્રાપ્તો વેપથુના નરઃ ।
મુહુર્ગ્લાનિપરશ્ચાસૌ મુહુર્જ્ઞાનબલન્વિતઃ ॥ ૨૩૪.૩૭॥

હિરણ્યધાન્યતયભાર્યાભૃત્યગૃહાદિષુ ।
એતે કથં ભવિષ્યન્તીત્યતીવમમતાકુલઃ ॥ ૨૩૪.૩૮॥

મર્મવિદ્ભિર્મહારોગૈઃ ક્રકચૈરિવ દારુણૈઃ ।
શરૈરિવાન્તકસ્યોગ્રૈશ્છિદ્યમાનાસ્થિબન્ધનઃ ॥ ૨૩૪.૩૯॥

પરિવર્તમાનતારાક્ષિહસ્તપાદં મુહુઃ ક્ષિપન્ ।
સંશુષ્યમાણતાલ્વોષ્ઠકણ્ઠો ઘુરઘુરાયતે ॥ ૨૩૪.૪૦॥

નિરુદ્ધકણ્ઠદેશીઽપિ ઉદાનશ્વાસપીડિતઃ ।
તાપેન મહતા વ્યાપ્તસ્તૃષા વ્યાપ્તસ્તથા ક્ષુધા ॥ ૨૩૪.૪૧॥

ક્લેશાદુત્ક્રાન્તિમાપ્નોતિ યામ્યકિંકરપીડિતઃ ।
તાપેન મહાત વ્યાપ્તસ્તૃષા વ્યાપ્તસ્તથા ક્ષુધા ॥ ૨૩૪.૪૨॥

એતાન્યન્યાનિ ચોગ્રાણિ દુઃખાનિ મરણે નૃણામ્ ।
શ્રૃણુધ્વં દર્શ યાનિ પ્રાપ્યન્તે પુરુષૈર્મૃતૈઃ ॥ ૨૩૪.૪૩॥

યામ્યકિંકરપાશાદિગ્રહણં દણ્ડતાડનમ્ ।
યમસ્ય દર્શનં ચોગ્રમુગ્રમાર્ગવિલોકનમ્ ॥ ૨૩૪.૪૪॥

કરમ્ભવાલુકાવિહ્નિયન્ત્રશસ્ત્રાદિભીષણે ।
પ્રત્યેકં યાતનાયાશ્ચ યાતનાદિ દ્વિજોત્તમાઃ ॥ ૨૩૪.૪૫॥

ક્રકચૈઃપીડ્યમાનાનાંમૃ(મૂ)ષાયાં ચાપિ ધ્માપ્યતામ્ ।
કુઠારૈઃ પાટ્યમાનાનાંભૂમૌ ચાપિ નિખન્યતામ્ ॥ ૨૩૪.૪૬॥

શૂલેષ્વારોપ્યમાણાનાં વ્યાઘ્રવક્ત્રે પ્રવેશ્યતામ્ ।
ગૃધ્રૈઃ સંભક્ષ્યમાણાનાં દ્વીપિભિશ્ચોપભુજ્યતામ્ ॥ ૨૩૪.૪૭॥

ક્વથ્યતાં તૈલમધ્યે ચ ક્લિદ્યતાં ક્ષારકર્દમે ।
ઉચ્ચાન્નિપાત્યમાનાનાં ક્ષિપ્યતાં ક્ષેપયન્ત્રકૈઃ ॥ ૨૩૪.૪૮॥

નરકે યાનિ દુઃખાનિ પાપહેતૂદ્ભવાનિ વૈ ।
પ્રાપ્યન્તે નારકૈર્વિપ્રાસ્તેષાં સંખ્યા ન વિદ્યતે ॥ ૨૩૪.૪૯॥

ન કેવલં દ્વિજશ્રેષ્ઠા નરકે દુઃખપદ્ધતિઃ ।
સ્વર્ગેઽપિ પાતભીતસ્ય ક્ષયિષ્ણોર્નાસ્તિ નિર્વૃતિઃ ॥ ૨૩૪.૫૦॥

પુનશ્ચ ગર્ભો ભવતિ જાયતે ચ પુનર્નરઃ ।
ગર્ભે વિલીયતે ભૂયો જાયમાનોઽસ્તમેતિ ચ ॥ ૨૩૪.૫૧॥

જાતમાત્રશ્ચ મ્રિયતે બાલભાવે ચ યૌવને ।
યદ્યત્પ્રીતિકરં પુંસાં વસ્તુ વિપ્રાઃ પ્રજાયતે ॥ ૨૩૪.૫૨॥

તદેવ દુઃખવૃક્ષસ્ય બીજત્વમુપગચ્છતિ ।
કલત્રપુત્રમિત્રાદિગૃહક્ષેત્રધનાદિકૈઃ ॥ ૨૩૪.૫૩॥

ક્રિયતે ન તથા ભૂરિ સુખં પુંસાં યથાઽસુખમ્ ।
ઇતિ સંસારદુઃખાર્કતાપતાપિતચેતસામ્ ॥ ૨૩૪.૫૪॥

વિમુક્તિપાદપચ્છાયામૃતે કુત્ર સુખં નૃણામ્ ।
તદસ્ય ત્રિવિધસ્યાપિ દુઃખજાતસ્ય પણ્ડિતૈઃ ॥ ૨૩૪.૫૫॥

ગર્ભજન્મજરાદ્યેષુ સ્થાનેષુ પ્રભવિષ્યતઃ ।
નિરસ્તાતિશયાહ્લાદં સુખભાવૈકલક્ષણમ્ ॥ ૨૩૪.૫૬॥

ભેષજં ભગવત્પ્રાપ્તિરેકા ચાઽઽત્યન્તિકી મતા ।
તસ્માત્તત્પ્રાપ્તયે યત્નઃ કર્તવ્યઃ પણ્ડિતૈર્નરૈઃ ॥ ૨૩૪.૫૭॥

તત્પ્રાપ્તિહેતુર્જ્ઞાનં ચ કર્મ ચોક્તં દ્વિજોત્તમાઃ ।
આગમોત્થં વિવેકાચ્ચ દ્વિધા જ્ઞાનં તથોચ્યતે ॥ ૨૩૪.૫૮॥

શબ્દબ્રહ્માઽઽગમમયં પરં બ્રહ્મ વિવેકજમ્ ।
અન્ધં તમ ઇવાજ્ઞાનં દીપવચ્ચેન્દ્રિયોદ્ભવમ્ ॥ ૨૩૪.૫૯॥

યથા સૂર્યસ્તથા જ્ઞાનં યદ્વૈ વિપ્રા વિવેકજમ્ ।
મનુરપ્યાહ વેદાર્થં સ્મૃત્વા યન્મુનિસત્તમાઃ ॥ ૨૩૪.૬૦॥

તદેતચ્છ્રૂયતામત્ર સંબન્ધે ગદતો મમ ।
દ્વે બ્રહ્મણી વેદિતવ્યે શબ્દબ્રહ્મ પરં ચ યત્ ॥ ૨૩૪.૬૧॥

શબ્દબ્રહ્મણિ નિષ્ણાતઃ પરં બ્રહ્માધિગચ્છતિ ।
દ્વે વિદ્યે વેદિતવ્યે ઇતિ ચાઽઽથર્વણી શ્રુતિઃ ॥ ૨૩૪.૬૨॥

પરયા હ્યક્ષરપ્રાપ્તિરૃગ્વેદાદિમયાઽપરા ।
યત્તદવ્યક્તમજરમચિન્ત્યમજમવ્યયમ્ ॥ ૨૩૪.૬૩॥

અનિર્દેશ્યમરૂપં ચ પાણિપાદાદ્યસંયુતમ્ ।
વિત્તં સર્વગતં નિત્યં ભૂતયોનિમકારણમ્ ॥ ૨૩૪.૬૪॥

વ્યાપ્યં વ્યાપ્યં યતઃ સર્વં તદ્વૈ પશ્યન્તિ સૂરયઃ ।
તદ્બ્રહ્મ પરમં ધામ તદ્ધ્યેયં મોક્ષકાઙ્ક્ષિભિઃ ॥। ૨૩૪.૬૫॥

શ્રુતિવાક્યોદિતં સૂક્ષ્મં તદ્વિષ્ણોઃ પરમં પદમ્ ।

ઉત્પત્તિં પ્રલયં ચૈવ ભૂતાનામગતિં ગતિમ્ ॥ ૨૩૪.૬૬॥

વેત્તિ વિદ્યામવિદ્યાં ચ સ વાચ્યો ભગવાનિતિ ।
જ્ઞાનશક્તિબલવૈશ્વર્યવીર્યતેજાંસ્યશેષતઃ ॥ ૨૩૪.૬૭॥

ભગવચ્છબ્દવાચ્યાનિ ચ સ વાચ્યો ભગવાનિતિ ।
જ્ઞાનશક્તિબલૈશ્વર્યવીર્યતેજાંસ્યશેષતઃ ॥ ૨૩૪.૬૮॥

ભૂતેષુ ચ સ સર્વાત્મા વાસુદેવસ્તતઃ સ્મૃતઃ ।
ઉવાચેદં મહર્ષિભ્યઃ પુરા પૃષ્ટઃ પ્રજાપતિઃ ॥ ૨૩૪.૬૯॥

નામાવ્યાખ્યામનન્તસ્ય વાસુદેવસ્ય તત્ત્વતઃ ।
ભૂતેષુ વસતે યોઽન્તર્વસન્ત્યત્ર ચ તાનિ યત્॥

ધાતા વિધાતા જગતાં વાસુદેવસ્તતઃ પ્રભુઃ ॥ ૨૩૪.૭૦॥

સસર્વભૂતપ્રકૃતિર્ગુણાંશ્ચ, દોષાંશ્ચ સર્વાન્સ(ન)ગુણો હ્યતીતઃ ।
અતીતસર્વાવરણોઽખિલાત્મા, તેનાઽઽવૃતં યદ્ભવનાન્તરાલમ્ ॥ ૨૩૪.૭૧॥

સમસ્તકલ્યાણગુણાત્મકો હિ, સ્વશક્તિલેશાદૃતભૂતસર્ગઃ ।
ઇચ્છાગૃહીતાભિમતોરુદેહઃ, સંસાધિતાશેષજગદ્ધિતોઽસૌ ॥ ૨૩૪.૭૨॥

તેજોબલૈશ્વર્યમહાવરોધઃ, સ્વવીર્યશક્ત્યાદિગુણૈકરાશિઃ ।
પરઃ પરાણાં સકલા ન યત્ર, ક્લેશાદયઃ સન્તિ પરાપરેશે ॥ ૨૩૪.૭૩॥

સ ઈશ્વરો વ્યષ્ટિસમષ્ટિરૂપોઽવ્યક્તસ્વરૂપઃ પ્રકટસ્વરૂપઃ ।
સર્વેશ્વરઃ સર્વદૃક્સર્વવેત્તા, સમસ્તશક્તિઃ પરમેશ્વરાખ્યઃ ॥ ૨૩૪.૭૪॥

સંજ્ઞાયતે યેન તદસ્તદોષં શુદ્ધં પરં નિર્મલમેકરૂપમ્ ।
સંદૃશ્યતે વાઽઽપ્યથ ગમ્યતે વા,તજ્જ્ઞાનમજ્ઞાનમતોઽન્યદુક્તમ્ ॥ ૨૩૪.૭૫॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વ્યાસર્ષિસંવાદ આત્યન્તિકલયનિરૂપણં નામ
ચતુસ્ત્રિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૩૪॥

---

અધ્યાયઃ ૨૩૫ (૧૨૭)

યોગાભ્યાસનિરૂપણમ્

મુનય ઊચુઃ

ઇદાનીં બ્રૂહિ યોગં ચ દુઃખસંયોગભેષજમ્ ।

યં વિદિત્વાઽવ્યયં તત્ર યુઞ્જામઃ પુરુષોત્તમમ્ ॥ ૨૩૫.૧॥

શ્રુત્વા સ વચનં તેષાં કૃષ્ણદ્વૈપાયનસ્તદા ।
અબ્રવીત્પરમપ્રીતો યોગી યોગવિદાં વરઃ ॥ ૨૩૫.૨॥

યોગં વક્ષ્યામિ ભો વિપ્રાઃ શ્રૃણુધ્વં ભવનાશનમ્ ।
યમભ્યસ્યાઽઽપ્નુ યાદ્યોગી મોક્ષં પરમદુર્લભમ્ ॥ ૨૩૫.૩॥

શ્રુત્વાઽઽદૌ યોગશાસ્ત્રાણિ ગુરુમારાધ્ય ભક્તિતઃ ।
ઇતિહાસં પુરાણં ચ વેદાંશ્ચૈવ વિચક્ષણઃ ॥ ૨૩૫.૪ ।
આહારં યોગદોષાંશ્ચ દેશકાલં ચ બુદ્ધિમાન્ ।
જ્ઞાત્વા સમભ્યસેદ્યોગં નિર્દ્વંદ્વો નિષ્પરિગ્રહઃ ॥ ૨૩૫.૫॥

ભુઞ્જન્સક્તું યવાગૂં ચ તક્રમૂલફલં પયઃ ।
યાવકં કણપિણ્યાકમાહારં યોગસાધનમ્ ॥ ૨૩૫.૬॥

ન મનોવિકલે ધ્માતે ન શ્રાન્તે ક્ષુધિતે તથા ।
ન દ્વંદ્વે ન ચ શીતે ચ ન ચોષ્ણે નાનિલાત્મકે ॥ ૨૩૫.૭॥

સશબ્દે ન જલાભ્યાસે જીર્ણગોષ્ઠે ચતુષ્પથે ।
સરીસૃપે શ્મશાને ચ ન નદ્યન્તેઽગ્નિસંનિધૌ ॥ ૨૩૫.૮॥

ન ચૈત્યે ન ચ વલ્મીકે સભયે કૂપસંનિધૈ ।
ન શુષ્કપર્ણનિચયે યોગં યુઞ્જીત કર્હિચિત્ ॥ ૨૩૫.૯॥

દેશાનેતાનનાદૃત્ય મૂઢત્વાદ્યો યુનક્તિ વૈ ।
પ્રવક્ષ્યે તસ્ય યે દોષા જાયન્તે વિઘ્નકારકાઃ ॥ ૨૩૫.૧૦॥

બાધિર્યં જડતા લોપઃ સ્મૃતેર્મૂકત્વમન્ધતા ।
જ્વરશ્ચ જાયતે સદ્યસ્તદ્વદજ્ઞાનસંભવઃ ॥ ૨૩૫.૧૧॥

તસ્માત્સર્વાત્મના કાર્યા રક્ષા યોગવિદા સદા ।
ધર્માર્થકામમોક્ષણાં શરીરં સાધનં યતઃ ॥ ૨૩૫.૧૨॥

આશ્રમે વિજને ગુહ્યે નિઃશબ્દે નિર્ભયે નગે ।
શૂન્યાગારે શુચૌરમ્યે ચૈકાન્તે દેવતાલયે ॥ ૨૩૫.૧૩॥

રજન્યાઃ પશ્ચિમે યામે પૂર્વે ચ સુસમાહિતઃ ।
પૂર્વાહ્ને મધ્યમે ચાહ્નિ યુક્તાહારો જિતેન્દ્રિયઃ ॥ ૨૩૫.૧૪॥

આસીનઃ પ્રાઙ્મુખો રમ્ય આસને સુખનિશ્ચલે ।
નાતિનીચે ન ચોચ્છ્રિતે નિસ્પૃહઃ સત્યવાક્શુચિઃ ॥ ૨૩૫.૧૫॥

યુક્તનિદ્રો જિતક્રોધઃ સર્વભૂતહિતે રતઃ ।
સર્વદ્વંદ્વસહો ધીરઃ સમકાયાઙ્ઘ્રિમસ્તકઃ ॥ ૨૩૫.૧૬॥

નાભૌ નિધાય હસ્તૌ દ્વૌ શાન્તઃ પદ્માસને સ્થિતઃ ।
સંસ્થાપ્ય દૃષ્ટિં નાસાગ્રે પ્રાણાનાયમ્ય વાગ્યતઃ ॥ ૨૩૫.૧૭॥

સમાહૃત્યેન્દ્રિયગ્રામં મનસા હૃદયે મુનિઃ ।
પ્રણવં દીર્ઘમુદ્યમ્ય સંવૃતાસ્યઃ સુનિશ્ચલઃ ॥ ૨૩૫.૧૮॥

રજસા તમસો વૃત્તિં સત્ત્વેન રજસસ્તથા ।
સંછાદ્ય નિર્મલં શાન્તે સ્થિતઃ સંવૃતલોચનઃ ॥ ૨૩૫.૧૯॥

હૃત્પદ્મકોટરે લીનં સર્વવ્યાપિ નિરઞ્જનમ્ ।
યુઞ્જીત શાન્તે સ્થિતઃ સંવૃતલોચનઃ ॥ ૨૩૫.૨૦॥

કરણેન્દ્રિયભૂતાનિ ક્ષેત્રજ્ઞે પ્રથમં ન્યસેત્ ।
ક્ષેત્રજ્ઞશ્ચ પરે યોજ્યસ્તતો યુઞ્જતિ યોગવિત્ ॥ ૨૩૫.૨૧॥

મનો યસ્યાન્તમભ્યેતિ પરમાત્મનિ ચઞ્ચલમ્ ।
સંત્યજ્ય વિષયાંસ્તસ્ય યોગસિદ્ધિઃ પ્રકાશિતા ॥ ૨૩૫.૨૨॥

યદા નિર્વિષયં ચિત્તં પરે બ્રહ્મણિ લીયતે ।
સમાધૌ યોગયુક્તસ્ય તદાઽભ્યેતિ પરં પદમ્ ॥ ૨૩૫.૨૩॥

અસંસક્તં યદા ચિત્તં યોગિનઃ સર્વકર્મસુ ।
ભવત્યાનન્દમાસાદ્ય તદા નિર્વાણમૃચ્છતિ ॥ ૨૩૫.૨૪॥

શુદ્ધં ધામત્રયાતીતં તુર્યાખ્યં પુરુષોત્તમમ્ ।
પ્રાપ્ય યોગબલાદ્યોગી મુચ્યતે નાત્ર સંશયઃ ॥ ૨૩૫.૨૫॥

નિઃસ્પૃહઃ સર્વકામેભ્યઃ સર્વત્ર પ્રિયદર્શનઃ ।
સર્વત્રાનિત્યબુદ્ધિસ્તુ યોગી મુચ્યેત નાન્યથા ॥ ૨૩૫.૨૬॥

ઇન્દ્રિયાણિ ન સેવેન વૈરાગ્યેણ ચ યોગવિત્ ।
સદા ચાભ્યાસયોગેન મુચ્યતે નાત્ર સંશયઃ ॥ ૨૩૫.૨૭॥

ન ચ પદ્માસનાદ્યોગો ન નાસાગ્રનિરીક્ષણાત્ ।

મનસશ્ચેન્દ્રિયાણાં ચ સંયોગો યોગ ઉચ્યતે ॥ ૨૩૫.૨૮॥

એવં મયા મુનિશ્રેષ્ઠા યોગઃ પ્રોક્તો વિમુક્તિદઃ ।
સંસારમોક્ષહેતુશ્ચ કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૨૩૫.૨૯॥

લોમહર્ષણ ઉવાચ
શ્રુત્વા તે વચનં તસ્ય સાધુ સાધ્વિતિ ચાબ્રુવન્ ।
વ્યાસં પ્રશસ્ય સમ્પૂજ્ય પુનઃ પ્રષ્ટું સમુદ્યતાઃ ॥ ૨૩૫.૩૦॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વ્યાસર્ષિસંવાદે યોગાભ્યાસનિરૂપણં નામ
પઞ્ચત્રિંશદધિકદ્વિશતતમોऽધ્યાયઃ ॥ ૨૩૫॥

---

અધ્યાયઃ ૨૩૬ (૧૨૮)
સાંખ્યયોગનિરૂપણમ્
મુનય ઊચુઃ
તવ વક્ત્રાબ્ધિસંભૂતમમૃતં વાઙ્મયં મુને ।
પિબતાં નો દ્વિજશ્રેષ્ઠ ન તૃપ્તિરિહ દૃશ્યતે ॥ ૨૩૬.૧॥

તસ્માદ્યોગં મુને બ્રૂહિ વિસ્તરેણ વિમુક્તિદમ્ ।
સાંખ્યં ચ દ્વિપદાં શ્રેષ્ઠ શ્રોતુમિચ્છામહે વયમ્ ॥ ૨૩૬.૨॥

પ્રજ્ઞાવાઞ્શ્રોત્રિયો યજ્વા ખ્યાતઃ પ્રાજ્ઞોऽનસૂયકઃ ।
સત્યધર્મમતિર્બ્રહ્મન્કથં બ્રહ્માધિગચ્છતિ ॥ ૨૩૬.૩॥

તપસા બ્રહ્મચર્યેણ સર્વત્યાગેન મેધયા ।
સાંખ્યે વા યદિ વા યોગ એતત્પૃષ્ટો વદસ્વ નઃ ॥ ૨૩૬.૪॥

મનસશ્ચેન્દ્રિયાણાં ચ યથૈકાગ્ર્યમવાપ્યતે ।
યેનોપાયેન પુરુષસ્તત્ત્વં વ્યાખ્યાતુમર્હસિ ॥ ૨૩૬.૫॥

વ્યાસ ઉવાચ
નાન્યત્ર જ્ઞાનતપસોર્નાન્યત્રેન્દ્રિયનિગ્રહાત્ ।
નાન્યત્ર સર્વસંત્યાગાત્સિદ્ધિં વિન્દતિ કશ્ચન ॥ ૨૩૬.૬॥

મહાભૂતાનિ સર્વાણિ પૂર્વસૃષ્ટિઃ સ્વયંભુવઃ ।
ભૂયિષ્ઠં પ્રાણભૃદ્ગ્રામે નિવિષ્ટાનિ શરીરિષુ ॥ ૨૩૬.૭॥

ભૂમેર્દેહો જલાત્સ્નેહો જ્યોતિષશ્ચક્ષુષી સ્મૃતે ।
પ્રાણાપાનાશ્રયો વાયુઃકોષ્ઠાકાશં શરીરિણામ્ ॥ ૨૩૬.૮॥

ક્રાન્તૌ વિષ્ણુર્બલે શક્રઃ કોષ્ઠેઽગ્નિર્ભોક્તુમિચ્છતિ ।
કર્ણયોઃ પ્રદિશઃ શ્રોત્રે જિહ્વાયાં વાક્સરસ્વતી ॥ ૨૩૬.૯॥

કર્ણૌ ત્વક્ચક્ષુષી જિહ્વા નાસિકા ચૈવ પઞ્ચમી ।
દશ તાનીન્દ્રિયોક્તાનિ દ્વારાણ્યાહારસિદ્ધયે ॥ ૨૩૬.૧૦॥

શબ્દસ્પર્શૌ તથા રૂપં રસં ગન્ધં ચ પઞ્ચમમ્ ।
ઇન્દ્રિયાર્થાન્પૃથગ્વિદ્યાદિન્દ્રિયેભ્યસ્તુ નિત્યદા ॥ ૨૩૬.૧૧॥

ઇન્દ્રિયાણિ મનો યુઙ્ક્તે અવશ્યા(શા)નિવ રાજિનઃ(લઃ) ।
મનશ્ચાપિ સદા યુઙ્ક્તે ભૂતાત્મા હૃદયાશ્રિતઃ ॥ ૨૩૬.૧૨॥

ઇન્દ્રિયાણાં તથૈવૈષાં સર્વેષામીશ્વરં મનઃ ।
નિયમે ચ વિસર્ગે ચ ભૂતાત્મા મનસસ્તથા ॥ ૨૩૬.૧૩॥

ઇન્દ્રિયાણીન્દ્રિયાર્થશ્ચ સ્વભાવશ્ચેતના મનઃ ।
પ્રાણાપાનૌ ચ જીવશ્ચ નિત્યં દેહેષુ દેહિનામ્ ॥ ૨૩૬.૧૪॥

આશ્રયો નાસ્તિ સત્ત્વસ્ય ગુણશબ્દો ન ચેતનાઃ ।
સત્ત્વં હિ તેજઃ સૃજતિ ન ગુણાન્વૈ કથંચન ॥ ૨૩૬.૧૫॥

એવં સપ્તદશં દેહં વૃતં ષોડશભિર્ગુણૈઃ ।
મનીષી મનસા વિપ્રાઃ પશ્યત્યાત્માનમાત્મનિ ॥ ૨૩૬.૧૬॥

ન હ્યં ચક્ષુષા દૃશ્યો ન ચ સર્વૈરપીન્દ્રિયૈઃ ।
મનસા તુ પ્રદીપ્તેન મહાનાત્મા પ્રકશતે ॥ ૨૩૬.૧૭॥

અશબ્દસ્પર્શરૂપં તચ્ચ(ચ્ચા)રસાગન્ધમવ્યયમ્ ।
અશરીરં શરીરે સ્વે નિરીક્ષેત નિરિન્દ્રિયમ્ ॥ ૨૩૬.૧૮॥

અવ્યક્તં સર્વદેહેષુ મર્ત્યેષુ પરમાર્ચિતમ્ ।
યોઽનુપશ્યતિ સ પ્રેત્ય કલ્પતે બ્રહ્મભૂયતઃ ॥ ૨૩૬.૧૯॥

વિદ્યાવિનયસમ્પન્નબ્રાહ્મણે ગવિ હસ્તિનિ ।
શુનિ ચૈવ શ્વપાકે ચ પણ્ડિતાઃ સમદર્શિનઃ ॥ ૨૩૬.૨૦॥

સ હિ સર્વેષુ ભૂતેષુ જઙ્ગમેષુ ધ્રુવેષુ ચ ।

વસત્યેકો મહાનાત્મા યેન સર્વમિદં તતમ્ ॥ ૨૩૬.૨૧॥

સર્વભૂતેષુ ચાઽઽત્માનં સર્વભૂતાનિ ચાઽઽત્મનિ ।
યદા પશ્યતિ ભૂતાત્મા બ્રહ્મ સમ્પદ્યતે તદા ॥ ૨૩૬.૨૨॥

યાવાનાત્મનિ વેદાઽઽત્મા તાવાનાત્મા પરાત્મનિ ।
ય એવં સતતં વેદ સોઽમૃતત્વાય કલ્પતે ॥ ૨૩૬.૨૩॥

સર્વભૂતાત્મભૂતસ્ય સર્વભૂતહિતસ્ય ચ ।
દેવાપિ માર્ગે મુહ્યન્તિ અપદસ્ય પદૈષિણઃ ॥ ૨૩૬.૨૪॥

શકુન્તાનામિવાઽઽકાશે મત્સ્યાનામિવ ચોદકે ।
યથા ગતિર્ન દૃશ્યેન તથા જ્ઞાનવિદાં ગતિઃ ॥ ૨૩૬.૨૫॥

કાલઃ પચતિ ભૂતાનિ સર્વાણ્યેવાઽઽત્મનાઽઽત્મનિ ।
યસ્મિંસ્તુ પચ્યતે કાલસ્તન્ન વેદેહ કશ્ચન ॥ ૨૩૬.૨૬॥

ન તદુર્ધ્વં ન તિર્યક્ચ નાધો ન ચ પુનઃ પુનઃ ।
ન મધ્યે પ્રતિગૃહ્ણીતે નૈવ કિંચિન્ન કશ્ચન ॥ ૨૩૬.૨૭॥

સર્વે તત્સ્થા ઇમે લોકા બાહ્યમેષાં ન કિંચન ।
યદ્યપ્યગ્રે સમાગચ્છેદ્યતા બાણો ગુણચ્યુતઃ ॥ ૨૩૬.૨૮॥

નૈવાન્તં કારણસ્યેયાદ્યદ્યપિ સ્યાન્મનોજવઃ ।
તસ્માત્સૂક્ષ્મતરં નાસ્તિ નાસ્તિ સ્થૂલતરં તથા ॥ ૨૩૬.૨૯॥

સર્વતઃ પાણિપાદં તત્સર્વતોઽક્ષિશિરોમુખમ્ ।
સર્વતઃશ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૨૩૬.૩૦॥

તદેવાણોરણુતરં તન્મહદ્ભ્યો મહત્તરમ્ ।
તદન્તઃ સર્વભૂતાનાં ધ્રુવં તિષ્ઠન્ન દૃશ્યતે ॥ ૨૩૬.૩૧॥

અક્ષરં ચ ક્ષરં ચૈવ દ્વેધા ભાવોઽયમાત્મનઃ ।
ક્ષકઃ સર્વેષુ ભૂતેષુ દિવ્યં ત્વમૃતમક્ષરમ્ ॥ ૨૩૬.૩૨॥

નવદ્વારં પુરં કૃત્વા હંસો હિ નિયતો વશી ।
ઈદૃશઃ સર્વભૂતસ્ય સ્થાવરસ્ય ચરસ્ય ચ ॥ ૨૩૬.૩૩॥

હાનેનાભિવિકલ્પાનાં નરાણાં સંચયેન ચ ।
શરીરાણામજસ્યાઽઽહુર્હંસત્વં પારદર્શિનઃ ॥ ૨૩૬.૩૪॥

હંસોક્તં ચ ક્ષરં ચૈવ કૂટસ્થં યત્તદક્ષરમ્ ।
તદ્વિદ્વાનક્ષરં પ્રાપ્ય જહાતિ પ્રાણજન્મની ॥ ૨૩૬.૩૫॥

વ્યાસ ઉવાચ
ભવતાં પૃચ્છતાં વિપ્રા યથાવદિહ તત્ત્વતઃ ।
સાંખ્યં જ્ઞાનેન સંયુક્તં તદેતત્કીર્તિતં મયા ॥ ૨૩૬.૩૬॥

યોગકૃત્યં તુ ભો વિપ્રાઃ કીર્તયિષ્યામ્યતઃ પરમ્ ।
એકત્વં બુદ્ધિમનસોરિન્દ્રિયાણાં ચ સર્વશઃ ॥ ૨૩૬.૩૭॥

આત્મનો વ્યાપિનો જ્ઞાનં જ્ઞાનમેતદનુત્તમમ્ ।
તદેતદુપશાન્તેન દાન્તેનાધ્યાત્મશીલિના ॥ ૨૩૬.૩૮॥

આત્મારામેણ બુદ્ધેન બોદ્ધવ્યં શુચિકર્મણા ।
યોગદોષાન્સમુચ્છિદ્ય પઞ્ચ યાન્કવયો વિદુઃ ॥ ૨૩૬.૩૯॥

કામં ક્રોદં ચ લોભં ચ ભયં સ્વપ્નં પઞ્ચમમ્ ।
ક્રોધં શમેન જયતિ કામં સંકલ્પવર્જનાત્ ॥ ૨૩૬.૪૦॥

સત્ત્વસંસેવનાદ્ધીરો નિદ્રામુચ્છેત્તુમર્હતિ ।
ધૃત્યા શિશ્નોદરં રક્ષેત્પાણિપાદં ચ ચક્ષુષા ॥ ૨૩૬.૪૧॥

ચક્ષુઃ શ્રોત્રં ચ મનસા મનો વાચં ચ કર્મણા ।
અપ્રમાદાદ્ભયં જહ્યદ્દમ્ભં પ્રાજ્ઞોપસેવનાત્ ॥ ૨૩૬.૪૨॥

એવમેતાન્યોગદોષાઞ્જયેન્નિત્યમતન્દ્રિતઃ ।
અગ્નીંશ્ચ બ્રાહ્મણાંશ્ચાથ દેવતાઃ પ્રણમેત્સદા ॥ ૨૩૬.૪૩॥

વર્જયેદુદ્ધતાં વાચં હિંસાયુક્તાં મનોનુગામ્ ।
બ્રહ્મતેજોમયં શુક્રં યસ્ય સર્વમિદં જગત્ ॥ ૨૩૬.૪૪॥

એતસ્ય ભૂતભૂતસ્ય દૃષ્ટં સ્થાવરજઙ્ગમમ્ ।
ધ્યાયનમધ્યયનં દાનં સત્યં હ્રીરાર્જવં ક્ષમા ॥ ૨૩૬.૪૫॥

શૌચં ચૈવાઽઽત્મનઃ શુદ્ધિરિન્દ્રયાણાં ચ નિગ્રહઃ ।
એતૈર્વિવર્ધતે તેજઃ પાપ્માનં ચાપકર્ષતિ ॥ ૨૩૬.૪૬॥

સમઃ સર્વેષુ ભૂતેષુ લભ્યાલભ્યેન વર્તયન્

ધૂતપાપ્મા તુ તેજસ્વી લઘ્વાહારો જિતેન્દ્રિયઃ ॥ ૨૩૬.૪૭॥

તામત્રધૌ વશે કૃત્વા નિષેવેદ્બ્રહ્મણઃ પદમ્ ।
મનસશ્ચેન્દ્રિયાણાં ચ કૃત્વૈકાગ્ર્યં સમાહિતઃ ॥ ૨૩૬.૪૮॥

પૂર્વરાત્રે પરાર્ધે ચ ધારયેન્મન આત્મનઃ ।
જન્તોઃ પઞ્ચેન્દ્રિયસ્યાસ્ય યદ્યેકં ક્લિન્નમિન્દ્રિયમ્ ॥ ૨૩૬.૪૯॥

તતોઽસ્ય સ્રવતિ પ્રજ્ઞા ગિરેઃ પાદાદિવોદકમ્ ।
મનસઃ પૂર્વમાદદ્યાત્કૂર્માણામિવ મત્સ્યહા ॥ ૨૩૬.૫૦॥

તતઃ શ્રોત્રં તતશ્ચક્ષુર્જિહ્વા ઘ્રાણં ચ યોગવિત્ ।
તત એતાનિ સંયમ્ય મનસિ સ્થાપયેદ્યદિ ॥ ૨૩૬.૫૧॥

તથૈવાપોહ્ય સંકલ્પાન્મનો હ્યાત્મનિ ધારયેત્ ।
પઞ્ચેન્દ્રિયાણિ મનસિ હૃદિ સંસ્થાપયેદ્યદિ ॥ ૨૩૬.૫૨॥

યદૈતાન્યવતિષ્ઠન્તે મનઃ ષષ્ઠાનિ ચાઽઽત્મનિ ।
પ્રસીદન્તિ ચ સંસ્થાયાં તદા બ્રહ્મ પ્રકાશતે ॥ ૨૩૬.૫૩॥

વિધૂમ ઇવ દીપ્તાર્ચિરાગત્ય ઇવ દીપ્તિમાન્ ।
વૈદ્યુતોઽગ્નિરિવાઽઽકાશે પશ્યન્ત્યાત્માનમાત્મનિ ॥ ૨૩૬.૫૪॥

સર્વં તત્ર તુ સર્વત્ર વ્યાપકત્વાચ્ચ દૃશ્યતે ।
તં પશ્યન્તિ મહાત્માનો બ્રાહ્મણા યે મનીષિણઃ ॥ ૨૩૬.૫૫॥

ધૃતિમન્તો મહાપ્રાજ્ઞાઃ સર્વભૂતહિતે રતાઃ ।
એવં પરિમિતં કાલમાચરન્સંશિતવ્રતઃ ॥ ૨૩૬.૫૬॥

આસીનો હિ રહસ્યેકો ગચ્છેદક્ષરસામ્યતામ્ ।
પ્રમોહો ભ્રમ આવર્તો ઘ્રાણં શ્રવણદર્શને ॥ ૨૩૬.૫૭॥

અદ્ભુતાનિ રસઃ સ્પર્શઃ શીતોષ્ણમારુતાકૃતિઃ ।
પ્રતિભાનુપસર્ગાશ્ચ પ્રતિસંગૃહ્ય યોગતઃ ॥ ૨૩૬.૫૮॥

તાંસ્તત્ત્વવિદનાદૃત્ય સામ્યેનૈવ નિવર્તયેત્ ।
કુર્યાત્પરિચયં યોગે ત્રૈલોક્યે નિયતો મુનિઃ ॥ ૨૩૬.૫૯॥

ગિરિશૃઙ્ગે તથા ચૈત્યે વૃક્ષમૂલેષુ યોજયેત્ ।
સંનિયમ્યેન્દ્રિયગ્રામં કોષ્ઠે ભાણ્ડમના ઇવ ॥ ૨૩૬.૬૦॥

એકાગ્રં ચિન્તયેન્નિત્યં યોગાન્નોદ્વિજતે મનઃ ।
યેનોપયેન શક્યેત નિયન્તું ચઞ્ચલં મનઃ ॥ ૨૩૬.૬૧॥

તત્ર યુક્તો નિષેવેત ન ચૈવ વિચલેત્તતઃ ।
શૂન્યાગારાણિ ચૈકાગ્રો નિવાસાર્થમુપક્રમેત્ ॥ ૨૩૬.૬૨॥

નાતિવ્રજેત્પરં વાચા કર્મણા મનસાઽપિ વા ।
ઉપેક્ષકો યથાહારો લબ્ધાલબ્ધસમો ભવેત્ ॥ ૨૩૬.૬૩॥

યશ્ચૈનમભિનન્દેત યશ્ચૈનમભિવાદયેત્ ।
સમસ્તયોશ્ચાપ્યુભયોર્નાભિધ્યાયેચ્છુભાશુભમ્ ॥ ૨૩૬.૬૪॥

ન પ્રહૃષ્યેન લાભેષુ નાલાભેષુ ચ ચિન્તયેત્ ।
સમઃ સર્વેષુ ભૂતેષુ સધર્મા માતરિશ્વનઃ ॥ ૨૩૬.૬૫॥

એવં સ્વસ્થાત્મનઃ સાધોઃ સર્વત્ર સમદર્શિનઃ ।
ષણ્માસાન્નિત્યયુક્તસ્ય શબ્દબ્રહ્મભિવર્તતે ॥ ૨૩૬.૬૬॥

વેદનાર્તાન્પરાન્દૃષ્ટ્વા સમલષ્ટાશ્મકાઞ્ચનઃ ।
એવં તુ નિરતો માર્ગં વિરમેન્ન વિમીહિતઃ ॥ ૨૩૬.૬૭॥

અપિ વર્ણાવકૃષ્ટસ્તુ નારી વા ધર્મકાઙ્ક્ષિણી ।
તાવપ્યેતેન માર્ગેણ ગચ્છેતાં પરમાં ગતિમ્ ॥ ૨૩૬.૬૮॥

અજં પુરાણમજરં સનાતનં, યમિન્દ્રિયાતિગમગોચરં દ્વિજાઃ ।
અવેક્ષ્ય ચેમાં પરમેષ્ઠિસામ્યતાં, પ્રયાન્ત્યનાવૃત્તિગતિં મનીષિણઃ ॥ ૨૩૬.૬૯॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વ્યાસર્ષિસંવાદે સાંખ્યયોગનિરૂપણં નામ
પઞ્ચત્રિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૩૬॥

---

અધ્યાયઃ ૨૩૭ (૧૨૯)

જ્ઞાનિનાં મોક્ષપ્રાપ્તિનિરૂપણમ્

મુનય ઊચુઃ

યદ્યેવં વેદવચનં કુરુ કર્મ ત્યજેતિ ચ ।
કાં દિશં વિદ્યયા યાન્તિ કાં ચ ગચ્છન્તિ કર્મણા ॥ ૨૩૭.૧॥

એતદ્વૈ શ્રોતુમિચ્છમસ્તદ્ભવાન્પ્રબ્રવીતુ નઃ ।
એતદન્યોન્યવૈરૂપ્યં વર્તતે પ્રતિકૂલતઃ ॥ ૨૩૭.૨॥

વ્યાસ ઉવાચ
શ્રૃણુધ્વં મુનિશાર્દૂલા યત્પૃચ્છધ્વં સમાસતઃ ।
કર્મવિદ્યામયૌ ચૌભૌ વ્યાખ્યાસ્યામિ ક્ષરાક્ષરૌ ॥ ૨૩૭.૩॥

યાં દિશં વિદ્યયા યાન્તિ યાં ગચ્છન્તિ ચ કર્મણા ।
શ્રૃણુધ્વં સાંપ્રતં વિપ્રા ગહનં હ્યેતદુત્તરમ્ ॥ ૨૩૭.૪॥

અસ્તિ ધર્મ ઇતિ યુક્તં નાસ્તિ તત્રૈવ યો વદેત્ ।
યક્ષસ્ય સાદૃશ્યમિદં યક્ષસ્યેદં ભવેદથ ॥ ૨૩૭.૫॥

દ્વાવિમાવથ પન્થાનૌ યત્ર વેદાઃ પ્રતિષ્ઠિતાઃ ।
પ્રવૃત્તિલક્ષણો ધર્મો નિવૃત્તો વા વિભાષિતઃ ॥ ૨૩૭.૬॥

કર્મણા બધ્યતે જન્તુર્વિદ્યયા ચ વિમુચ્યતે ।
તસ્માત્કર્મ ન કુર્વન્તિ યતયઃ પારદર્શિનઃ ॥ ૨૩૭.૭॥

કર્મણા જાયતે પ્રેત્ય મૂર્તિમાન્ષોડશાત્મકઃ ।
વિદ્યયા જાયતે નિત્યમવ્યક્તં હ્યક્ષરાત્મકમ્ ॥ ૨૩૭.૮॥

કર્મ ત્વેકે પ્રશંસન્તિ સ્વલ્પબુદ્ધિરતા નરાઃ ।
તેન તે દેહજાલેન રમયન્ત ઉપાસતે ॥ ૨૩૭.૯॥

યે તુ બુદ્ધિં પરાં પ્રાપ્તા ધર્મનૈપુણ્યદર્શિનઃ ।
ન તે કર્મ પ્રશંસન્તિ કૂપં નદ્યાં પિબન્નિવઃ ॥ ૨૩૭.૧૦॥

કર્મણાં ફલમાપ્નોતિ સુખદુઃખે ભવાભવૌ ।
વિદ્યયા તદવાપ્નોતિ યત્ર ગત્વા ન શોચતિ ॥ ૨૩૭.૧૧॥

ન મ્રિયતે યત્ર ગત્વા યત્ર ગત્વા ન જાયતે ।
ન જીર્યતે યત્ર ગત્વા યત્ર ગત્વા ન વર્ધતે ॥ ૨૩૭.૧૨॥

યત્ર તદ્બ્રહ્મ પરમમવ્યક્તમચલં ધ્રુવમ્ ।
અવ્યાકૃતમનાયામમમૃતં ચાધિયોગવિત્ ॥ ૨૩૭.૧૩॥

દ્વંદ્વૈર્ન યત્ર બાધ્યન્તે માનસેન ચ કર્મણા ।
સમાઃ સર્વત્ર મૈત્રાશ્ચ સર્વભૂતહિતે રતાઃ ॥ ૨૩૭.૧૪॥

વિદ્યામયોઽન્યઃ પુરુષો દ્વિજાઃ કર્મમયોઽપરઃ ।
વિપ્રાશ્ચન્દ્રસમસ્પર્શઃ સૂક્ષ્મયા કલયા સ્થિતઃ ॥ ૨૩૭.૧૫॥

તદેતદૃષિણા પ્રોક્તં વિસ્તરેણાનુગીયતે ।
ન વક્તું શક્યતે દ્રષ્ટું ચક્રતન્તુમિવામ્બરે ॥ ૨૩૭.૧૬॥

એકાદશવિકારાત્મા કલાસંભારસંભૃતઃ ।
મૂર્તિમાનિતિ તં વિદ્યાદ્વિપ્રાઃ કર્મગુણાત્મકમ્ ॥ ૨૩૭.૧૭॥

દેવો યઃ સંશ્રિતસ્તસ્મિન્બુદ્ધીન્દુરિવ પુષ્કરે ।
ક્ષેત્રજ્ઞં તં વિજાનીયાન્નિત્યં યોગજિતાત્મકમ્ ॥ ૨૩૭.૧૮॥

તમો રજશ્ચ સત્ત્વં ચ જ્ઞેયં જીવગુણાત્મકમ્ ।
જીવમાત્મગુણં વિદ્યાદાત્માનં પરમાત્મનઃ ॥ ૨૩૭.૧૯॥

સચેતનં જીવગુણં વદન્તિ, સ ચેષ્ટતે જીવગુણં ચ સર્વમ્ ।
તતઃ પરં ક્ષેત્રવિદો વદન્તિ, પ્રકલ્પયન્તો ભુવનાનિ સપ્ત ॥ ૨૩૭.૨૦॥

વ્યાસ ઉવાચ
પ્રકૃત્યાસ્તુ વિકારા યે ક્ષેત્રજ્ઞાસ્તે પરિશ્રુતાઃ ।
તે ચૈનં ન પ્રજાનન્તિ ન જાનાતિ સ તાનપિ ॥ ૨૩૭.૨૧॥

તૈશ્ચૈવ કુરુતે કાર્યં મનઃ ષષ્ઠૈરિહેન્દ્રિયૈઃ ।
સુદાન્તૈરિવ સંયન્તા દૃઢઃ પરમવાજિભિઃ ॥ ૨૩૭.૨૨॥

ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યઃ પરમં મનઃ ।
મનસસ્તુ પરા બુદ્ધિર્બુદ્ધેરાત્મા મહાન્પરઃ ॥ ૨૩૭.૨૩॥

મહતઃ પરમવ્યક્તમવ્યક્તાત્પરતોઽમૃતમ્ ।
અમૃતાન્ન પરં કિંચિત્સા કાષ્ઠા પરમા ગતિઃ ॥ ૨૩૭.૨૪॥

એવં સર્વેષુ ભૂતેષુ ગૂઢાત્મા ન પ્રકાશતે ।
દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા સૂક્ષ્મયા સૂક્ષ્મદર્શિભિઃ ॥ ૨૩૭.૨૫॥

અન્તરાત્મનિ સંલીય મનઃષષ્ઠાનિ મેધયા ।
ઇન્દ્રિયૈરિન્દ્રિયાર્થાંશ્ચ બહુચિત્તમચિન્તયન્ ॥ ૨૩૭.૨૬॥

ધ્યાનેઽપિ પરમં કૃત્વા વિદ્યાસમ્પાદિતં મનઃ ।
અનીશ્વરઃ પ્રશાન્તાત્મા તતો ગચ્છેત્પરં પદમ્ ॥ ૨૩૭.૨૭॥

ઇન્દ્રિયાણાં તુ સર્વેષાં વશ્યાત્મા ચલિતસ્મૃતિઃ ।
આત્મનઃ સમ્પ્રદાનેન મર્ત્યો મૃત્યુમુપાશ્નુતે ॥ ૨૩૭.૨૮॥

વિહત્ય સર્વસંકલ્પાન્સત્ત્વે ચિત્તં નિવેશયેત્ ।
સત્ત્વે ચિત્તં સમાવેશ્ય તતઃ કાલંજરો ભવેત્ ॥ ૨૩૭.૨૯॥

ચિત્તપ્રસાદેન યતિર્જહાતીહ શુભાશુભમ્ ।
પ્રસન્નાત્માઽઽત્મનિ સ્થિત્વા સુખમત્યન્તમશ્નુતે ॥ ૨૩૭.૩૦॥

લક્ષણં તુ પ્રસાદસ્ય યથા સ્વપ્ને સુખં ભવેત્ ।
નિર્વાતે વા યથા દીપો દીપ્યમાનો ન કમ્પતે ॥ ૨૩૭.૩૧॥

એવં પૂર્વાપરે રાત્રે યુઞ્જન્નાત્માનમાત્મના ।
લઘ્વાહારો વિશુદ્ધાત્મા પશ્યત્યાત્માનમાત્મનિ ॥ ૨૩૭.૩૨॥

રહસ્યં સર્વવેદાનામનૈતિહ્યમનાગમમ્ ।
આત્મપ્રત્યાયકં શાસ્ત્રમિદં પુત્રાનુશાસનમ્ ॥ ૨૩૭.૩૩॥

ધર્માખ્યાનેષુ સર્વેષુ સત્યાખ્યાનેષુ યદ્વસુ ।
દશવર્ષસહસ્રાણિ નિર્મથ્યામૃતમુદ્ધૃતમ્ ॥ ૨૩૭.૩૪॥

નવનીતં યથા દધ્નઃ કાષ્ઠાદગ્નિર્યથૈવ ચ ।
તથૈવ વિદુષાં જ્ઞાનં મુક્તિહેતોઃ સમુદ્ધૃતમ્ ॥ ૨૩૭.૩૫॥

સ્નાતકાનામિદં શાસ્ત્રં વાચ્યં પુત્રાનુશાસનમ્ ।
તદિદં નાપ્રશાન્તાય નાદાન્તાય તપસ્વિને ॥ ૨૩૭.૩૬॥

નાવેદવિદુષે વાચ્યં તથા નાનુગતાય ચ ।
નાસૂયકાયાનૃજવે ન ચાનિર્દિષ્ટકારિણે ॥ ૨૩૭.૩૭॥

ન તર્કશાસ્ત્રદગ્ધાય તથૈવ પિશુનાય ચ ।
શ્લાઘિને શ્લાઘનીયાય પ્રશાન્તાય તપસ્વિને ॥ ૨૩૭.૩૮॥

ઇદં પ્રિયાય પુત્રાય શિષ્યાયાનુગતાય તુ ।
રહસ્યધર્મં વક્તવ્યં નાન્યસ્મૈ તુ કથંચન ॥ ૨૩૭.૩૯॥

યદપ્યસ્ય મહીં દદ્યાદ્રત્નપૂર્ણામિમાં નરઃ ।
ઇતમેવ તતઃ શ્રેય ઇતિ મન્યેત તત્ત્વવિત્ ॥ ૨૩૭.૪૦॥

અતો ગુહ્યતરાર્થં તદધ્યાત્મમતિમાનુષમ્ ।

યત્તન્મહર્ષિભિર્દૃષ્ટં વેદાન્તેષુ ચ ગીયતે ॥ ૨૩૭.૪૧॥

તદ્યુષ્મભ્યં પ્રયચ્છામિ યન્માં પૃચ્છત સત્તમાઃ ।
યન્મે મનસિ વર્તેત યસ્તુ વો હૃદિ સંશયઃ॥

શ્રુતં ભવદ્ભિસ્તત્સર્વં કિમન્યત્કથયામિ વઃ ॥ ૨૩૭.૪૨॥

મુનય ઊચુઃ
અધ્યાત્મં વિસ્તરેણેહ પુનરેવ વદસ્વ નઃ ।
યદધ્યાત્મં યથા વિદ્મો ભગવન્નૃષિસત્તમ ॥ ૨૩૭.૪૩॥

વ્યાસ ઉવાચ
અધ્યાત્મં યદિદં વિપ્રાઃ પુરુષસ્યેહ પઠ્યતે ।
યુષ્મભ્યં કથયિષ્યામિ તસ્ય વ્યાખ્યાઽવધાર્યતામ્ ॥ ૨૩૭.૪૪॥

ભીમિરાપસ્તથા જ્યોતિર્વાયુરાકાશમેવ ચ ।
મહાભૂતાનિ યશ્ચૈવ સર્વભૂતેષુ ભૂતકૃત્ ॥ ૨૩૭.૪૫॥

મુનય ઊચુઃ
આકારં તુ ભવેદ્યસ્ય યસ્મિન્દેહં ન પશ્યતિ ।
આકાસાદ્યં શરીરેષુ કથં તદુપવર્ણયેત્॥

ઇન્દ્રિયાણાં ગુણાઃ કેચિત્કથં તાનુપલક્ષયેત્ ॥ ૨૩૭.૪૬॥

વ્યાસ ઉવાચ
એતદ્વો વર્ણયિષ્યામિ યથાવદનુદર્શનમ્ ।
શ્રૃણુધ્વં તદિહૈકાગ્ર્યા યથાતત્ત્વં યથા ચ તત્ ॥ ૨૩૭.૪૭॥

શબ્દઃ શ્રોત્રં તથા ખાનિ ત્રયમાકાશલક્ષણમ્ ।
પ્રાણશ્ચેષ્ટા તથા સ્પર્શ એતે વાયુગુણાસ્ત્રયઃ ॥ ૨૩૭.૪૮॥

રૂપં ચક્ષુર્વિપાકશ્ચ ત્રિધા જ્યોતિર્વિધીયતે ।
રસોઽથ રસનં સ્વેદો ગુણાસ્ત્વેતે ત્રયોઽમ્ભસામ્ ॥ ૨૩૭.૪૯॥

ઘ્રેયં ઘ્રાણં શરીરં ચ ભૂમેરેતે ગુણાસ્ત્રયઃ ।
એતાવાનિન્દ્રિયગ્રામો વ્યાખ્યાતઃ પાઞ્ચભૌતિકઃ ॥ ૨૩૭.૫૦॥

વાયોઃ સ્પર્શો રસોઽદ્ભ્યશ્ચ જ્યોતિષો રૂપમુચ્યતે ।
આકાશપ્રભવઃ શબ્દો ગન્ધો ભૂમિગુણઃ સ્મૃતઃ ॥ ૨૩૭.૫૧॥

મનો બુદ્ધિઃ સ્વભાવશ્ચ ગુણા એતે સ્વયોનિજાઃ ।
તે ગુણાનતિવર્તન્તે ગુણેભ્યઃ પરમા મતાઃ ॥ ૨૩૭.૫૨॥

યથા કુર્મ ઇવાઙ્ગાનિ પ્રસાર્ય સંનિયચ્છતિ ।
એવમેવેન્દ્રિયગ્રામં બુદ્ધિશ્રેષ્ઠો નિયચ્છતિ ॥ ૨૩૭.૫૩॥

યદૂર્ધ્વં પાદતલયોરવાર્કેર્દ્ધં ચ(ગધશ્ચ)પશ્યતિ ।
એતસ્મિન્નેવ કૃત્યે સા વર્તતે બુદ્ધિરુત્તમા ॥ ૨૩૭.૫૪॥

ગુણૈસ્તુ નીયતે બુદ્ધિર્બુદ્ધિરેવેન્દ્રિયાણ્યપિ ।
મનઃષષ્ઠાનિ સર્વાણિ બુદ્ધ્યા ભવાત્કુતો ગૃણાઃ ॥ ૨૩૭.૫૫॥

ઇન્દ્રિયાણિ નરૈઃ પઞ્ચ ષષ્ઠં તન્મન ઉચ્યતે ।
સપ્તમીં બુદ્ધિમેવાઽઽહુઃ ક્ષેત્રજ્ઞં વિદ્ધિ ચાષ્ટમમ્ ॥ ૨૩૭.૫૬॥

ચક્ષુરાલોકનાયૈવ સંશયં કુરુતે મનઃ ।
બુદ્ધિરધ્યવસાનાય સાક્ષી ક્ષેત્રજ્ઞ ઉચ્યતે ॥ ૨૩૭.૫૭॥

રજસ્તમશ્ચ સત્ત્વં ચ ત્રય એતે સ્વયોનિજાઃ ।
સમાઃ સર્વેષુ ભૂતેષુ તાન્ગુણાનુપલક્ષયેત્ ॥ ૨૩૭.૫૮॥

તત્ર યત્પ્રીતિસંયુક્તં કિંચિદાત્મનિ લક્ષયેત્ ।
પ્રશાન્તમિવ સંયુક્તં સત્ત્વં તદુપધારયેત્ ॥ ૨૩૭.૫૯॥

યત્તુ સંતાપસંયુક્તં કાયે મનસિ વા ભવેત્ ।
પ્રવૃત્તં રજ ઇત્યેવં તત્ર ચાપ્યુપલક્ષયેત્ ॥ ૨૩૭.૬૦॥

યત્તુ સંમોહસંયુક્તમવ્યક્તં વિષમં ભવેત્ ।
અપ્રતર્ક્યમવિજ્ઞેયં તમસ્તદુપદારયેત્ ॥ ૨૩૭.૬૧॥

પ્રહર્ષઃ પ્રીતિરાનન્દં સ્વામ્યં સ્વસ્થાત્મચિત્તતા ।
અકસ્માદ્યદિ વા કસ્માદ્વદન્તિ સાત્ત્વિકાન્ગુણાન્ ॥ ૨૩૭.૬૨॥

અભિમાનો મૃષાવાદો લોભો મહોસ્તથા ક્ષમા ।
લિઙ્ગાનિ રજસસ્તાનિ વર્તન્તે હેતુતત્ત્વતઃ ॥ ૨૩૭.૬૩॥

તથા મોહઃ પ્રમાદશ્ચ તન્દ્રી નિન્દ્રાઽપ્રબોધિતા ।
કથંચિદભિવર્તન્તે વિજ્ઞેયાસ્તામસા ગુણાઃ ॥ ૨૩૭.૬૪॥

મનઃ પ્રસૃજતે ભાવં બુદ્ધિરધ્યવસાયિની ।

હૃદયં પ્રિયમેવેહ ત્રિવિધા કર્મચોદના ॥ ૨૩૭.૬૫॥

ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યશ્ચ પરં મનઃ ।
મનસસ્તુ પરા બુદ્ધિર્બુદ્ધેરાત્મા પરઃ સ્મૃતઃ ॥ ૨૩૭.૬૬॥

બુદ્ધિરાત્મા મનુષ્યસ્ય બુદ્ધિરેવાऽऽત્મનાયિકા ।
યદા વિકુરુતે ભાવં તદા ભવતિ સા મનઃ ॥ ૨૩૭.૬૭॥

ઇન્દ્રિયાણાં પૃથગ્ભાવાદ્બુદ્ધિર્વિકુરુતે હ્યનુ ।
ક્ષૃણ્વતી ભવતિ શ્રોત્રં સ્પૃશતી સ્પર્શ ઉચ્યતે ॥ ૨૩૭.૬૮॥

પશ્યન્તિ ચ ભવેદ્દૃષ્ટી રસન્તી ભવેત્ ।
જિઘ્રન્તી ભવતિ ઘ્રાણં બુદ્ધિર્વિકુરુતે પૃથક્ ॥ ૨૩૭.૬૯॥

ઇન્દ્રિયાણિ તુ તાન્યાહુસ્તેષાં વૃત્ત્યા વિતિષ્ઠતિ ।
તિષ્ઠતિ પુરુષે બુદ્ધિર્બુદ્ધિભાવવ્યવસ્થિતા ॥ ૨૩૭.૭૦॥

કદાચિલ્લભતે પ્રીતિં કદાચિદપિ શોચતિ ।
ન સુખેન ન દુઃખેન કદાચિદિહ મુહ્યતે ॥ ૨૩૭.૭૧॥

સ્વયં ભાવાત્મિકા ભાવાંસ્ત્રીનેતાનતિવર્તતે ।
સરિતાં સાગરો ભર્તા મહાવેલામિવોર્મિમાન્ ॥ ૨૩૭.૭૨॥

યદા પ્રાર્થયતે કિંચિત્તદા ભવતિ સા મનઃ ।
અધિષ્ઠાને ચ વૈ બુદ્ધ્યા પૃથગેતાનિ સંસ્મરેત્ ॥ ૨૩૭.૭૩॥

ઇન્દ્રિયાણિ ચ મેધ્યાનિ વિચેતવ્યાનિ કૃત્સ્નશઃ ।
સર્વાણ્યેવાનુપૂર્વેણ યદ્યદા ચ વિધીયતે ॥ ૨૩૭.૭૪॥

અભિભાગમના બુદ્ધિર્ભાવો મનસિ વર્તતે ।
પ્રવર્તમાનસ્તુ રજઃ સત્ત્વમપ્યતિવર્તતે ॥ ૨૩૭.૭૫॥

યે વૈ ભાવેન વર્તન્તે સર્વેષ્વેતેષુ તે ત્રિષુ ।
અન્વર્થાન્સમ્પ્રવર્તન્તે રથનેમિમરા ઇવ ॥ ૨૩૭.૭૬॥

પ્રદીપાર્થં મનઃ કુર્યાદિન્દ્રિયૈર્બુદ્ધિસત્તમૈઃ ।
નિશ્ચરદ્ભિર્યથાયોગમુદાસીનૈર્યદૃચ્છયા ॥ ૨૩૭.૭૭॥

એવં સ્વભાવમેવેદમિતિ બુદ્ધ્વા ન મુહ્યતિ ।
અશોચન્સમ્પ્રહૃષ્યંશ્ચ નિત્ય વિગતમત્સરઃ ॥ ૨૩૭.૭૮॥

ન હ્યાત્મા શક્યતે દ્રષ્ટુમિન્દ્રિયૈઃ કામગોચરૈઃ ।
પ્રવર્તમાનૈરનેકૈર્ર્ધદુરૈરકૃતાત્મભિઃ ॥ ૨૩૭.૭૯॥

તેષાં તુ મનસા રશ્મીન્યદા સમ્યઙ્નિયચ્છતિ ।
તદા પ્રકાશતેઽસ્યાઽઽત્મા દીપદીપ્તા યથાઽઽકૃતિઃ ॥ ૨૩૭.૮૦॥

સર્વેષામેવ ભૂતાનાં તમસ્યુપગતે યથા ।
પ્રકાશં ભવતે સર્વં તથૈવમુપધાર્યતામ્ ॥ ૨૩૭.૮૧॥

યથા વારિચરઃ પક્ષી ન લિપ્યતિ જલે ચરન્ ।
વિમુક્તાત્મા તથા યોગી ગુણદોષૈર્ન લિપ્યતે ॥ ૨૩૭.૮૨॥

એવમેવ કૃતપ્રજ્ઞો ન દોષૈર્વિષયાંશ્ચરન્ ।
અસજ્જમાનઃ સર્વેષુ ન કથંચિત્પ્રલિપ્યતે ॥ ૨૩૭.૮૩॥

ત્યક્ત્વા પૂર્વકૃતં કર્મરતિર્યસ્ય સદાઽઽત્મનિ ।
સર્વભૂતાત્મભૂતસ્ય ગુણસઙ્ગેન સજ્જતઃ ॥ ૨૩૭.૮૪॥

સ્વયમાત્મા પ્રસવતિ ગુણેષ્વપિ કદાચન ।
ન ગુણા વિદુરાત્માનં ગુણાન્વેદ સ સર્વદા ॥ ૨૩૭.૮૫॥

પરિદધ્યાદ્ગુણાનાં સ દ્રષ્ટા ચૈવ યથાતથમ્ ।
સત્ત્વક્ષેત્રજ્ઞયોરેવમન્તરં લક્ષયેન્નરઃ ॥ ૨૩૭.૮૬॥

સૃજતે તુ ગુણાનેક એકો ન સૃજતે ગુણાન્ ।
પૃથગ્ભૂતૌ પ્રકૃત્યૈતૌ સમ્પ્રયુક્તૌ ચ સર્વદા ॥ ૨૩૭.૮૭॥

યથાઽશ્મના હિરણ્યસ્ય સમ્પ્રયુક્તૌ તથૈવ તૌ ।
મશકૌદુમ્બરૌ વાઽપિ સમ્પ્રયુક્તૌ યથા સહ ॥ ૨૩૭.૮૮॥

ઇષિકા વા યથા મુઞ્જે પૃથક્ચ સહ ચૈવાહ ।
તથૈવ સહિતાવેતૌ અન્યોન્યસ્મિન્પ્રતિષ્ઠિતૌ ॥ ૨૩૭.૮૯॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વ્યાસર્ષિસંવાદે
સપ્તત્રિંશદધિકદ્વિશતતમોધ્યાયઃ ॥ ૨૩૭॥

---

અધ્યાયઃ ૨૩૮ (૧૩૦)

ગુણસર્જનકથનમ્

વ્યાસ ઉવાચ

સૃજતે તુ ગુણાન્સત્ત્વે ક્ષેત્રજ્ઞસ્ત્વધિતિષ્ઠતિ ।
ગુણાન્વિક્રિયતઃ સર્વાનુદાસીનવદીશ્વરઃ ॥ ૨૩૮.૧॥

સ્વભાવયુક્તં તત્સર્વં યદિમાન્સૃજતે ગુણાન્ ।
ઊર્ણનાભિર્યથા સૂત્રં સૃજતે તદ્ગુણાંસ્તથા ॥ ૨૩૮.૨॥

પ્રવૃત્તા ન નિવર્તન્તે પ્રવૃત્તિર્નોપલભ્યતે ।
એવમેક વ્યવસ્યન્તિ નિવૃત્તિમિતિ ચાપરે ॥ ૨૩૮.૩॥

ઉભયં સમ્પ્રધાર્યૈતદધ્યવસ્યેદ્યથામતિ ।
અનેનૈવ વિધાનેન ભવેદ્વૈ સંશયો મહાન્ ॥ ૨૩૮.૪॥

અનાદિનિધનો હ્યાત્મા તં બુદ્ધ્વા વિહરેન્નરઃ ।
અક્રુધ્યન્નપ્રહૃષ્યંશ્ચ નિત્યં વિગતમત્સરઃ ॥ ૨૩૮.૫॥

ઇત્યેવં હૃદયે સર્વો બુદ્ધિચિન્તામયં દૃઢમ્ ।
અનિત્યં સુખમાસીનમશોચ્યં છિન્નસંશયઃ ॥ ૨૩૮.૬॥

તરયેત્પ્રચ્યુતાં પૃથ્વીં યથા પૂર્ણાં નદીં નરાઃ ।
અવગાહ્ય ચ વિદ્વાંસો વિપ્રા લોલમિમં તથા ॥ ૨૩૮.૭॥

ન તુ તપ્યતિ વૈ વિદ્વાન્સ્થલે ચરતિ તત્ત્વવિત્ ।
એવં વિચિન્ત્ય ચાઽઽત્માનં કેવલં જ્ઞાનમાત્મનઃ ॥ ૨૩૮.૮॥

તાં(તં)તુ બુદ્ધ્વા નરઃ સર્ગં ભૂતાનામાગતિં ગતિમ્ ।
સમચેષ્ટશ્ચ વૈ સમ્યગ્લભતે શમમુત્તમમ્ ॥ ૨૩૮.૯॥

એતદ્વિજન્મસામગ્ર્યં બ્રાહ્મણસ્ય વિશેષતઃ ।
આત્મજ્ઞાનસમસ્નેહપર્યાપ્તં તત્પરાયણમ્ ॥ ૨૩૮.૧૦॥

ત્વં બુદ્ધ્વા ભવેદ્બુદ્ધઃ કિમન્યદ્બુદ્ધલક્ષણમ્ ।
વિજ્ઞાયૈતદ્વિમુચ્યન્તે કૃતકૃત્યા મનીષિણઃ ॥ ૨૩૮.૧૧॥

ન ભવતિ વિદુષાં મહદ્ભયં, યદવિદુષાં સુમહદ્ભયં પરત્ર ।
ન હિ ગતિરધિકાઽસ્તિ કસ્યચિદ્ભવતિ હિ યા વિદુષઃ સનાતની ॥ ૨૩૮.૧૨॥

લોકે માતરમસૂયતે નરસ્તત્ર દેવમનિરીક્ષ્ય શોચતે ।

તત્ર ચેત્કુશલો ન શોચતે, યે વિદુસ્તદુભયં કૃતાકૃતમ્ ॥ ૨૩૮.૧૩॥

યત્કરોત્યનભિસંધિપૂર્વકં, તચ્ચ નિન્દયતિ યત્પુરા કૃતમ્ ।
યત્પ્રિયં તદુભયં ન વાઽપ્રિયં, તસ્ય તજ્જનયતીહ કુર્વતઃ ॥ ૨૩૮.૧૪॥

મુનય ઊચુઃ
યસ્માદ્ધર્માત્પરો ધર્મો વિદ્યતે નેહ કશ્ચન ।
યો વિશિષ્ટશ્ચ ભૂતેભ્યસ્તદ્ભવાન્પ્રબ્રવીતુ નઃ ॥ ૨૩૮.૧૫॥

વ્યાસ ઉવાચ
ધર્મં ચ સમ્પ્રવક્ષ્યામિ પુરાણમૃષિભિઃ સ્તુતમ્ ।
વિશિષ્ટં સર્વધર્મેભ્યઃ શ્રૃણુધ્વં મુનિસત્તમાઃ ॥ ૨૩૮.૧૬॥

ઇન્દ્રિયાણિ પ્રમાથીનિ બુદ્ધ્યા સંયમ્ય તત્ત્વતઃ ।
સર્વતઃ પ્રસૃતાનીહ પિતા બાલાનિવાઽઽત્મજાન્ ॥ ૨૩૮.૧૭॥

મનસશ્ચેન્દ્રિયાણાં ચાપ્યૈકાગ્ર્યં પરમં તપઃ ।
વિજ્ઞેયઃ સર્વધર્મેભ્યઃ સ ધર્મઃ પર ઉચ્યતે ॥ ૨૩૮.૧૮॥

તાનિ સર્વાણિ સંધાય મનઃ ષષ્ઠાનિ મેધયા ।
આત્મતૃપ્તઃ સ એવાઽઽસીદ્બહુચિન્ત્યમચિન્તયન્ ॥ ૨૩૮.૧૯॥

ગોચરેભ્યો નિવૃત્તાનિ યદા સ્થાસ્યન્તિ વેશ્મનિ ।
તદા ચૈવાઽઽત્મનાઽઽત્માનં પરં દ્રક્ષ્યથ શાશ્વતમ્ ॥ ૨૩૮.૨૦॥

સર્વાત્માનં મહાત્માનં વિધૂમમિવ પાવકમ્ ।
પ્રપશ્યન્તિ મહાત્માનં બ્રાહ્મણા યે મનીષિણઃ ॥ ૨૩૮.૨૧॥

યથા પુષ્પફલોપેતો બહુશાખો મહાદ્રુમઃ ।
આત્મનો નાભિજાનીતે ક્વ મે પુષ્પં ક્વ મે ફલમ્ ॥ ૨૩૮.૨૨॥

એવમાત્મા ન જાનીતે ક્વ ગમિષ્યે કુતોઽન્વહમ્ ।
અન્યો હ્યસ્યાન્તરાત્માઽસ્તિ યઃ સર્વમનુપશ્યતિ ॥ ૨૩૮.૨૩॥

જ્ઞાનદીપેન દીપ્તેમન પશ્યત્યાત્માનમાત્મના ।
દૃષ્ટ્વાઽઽત્માનં તથા યૂયં વિરાગા ભવત દ્વિજાઃ ॥ ૨૩૮.૨૪॥

વિમુક્તાઃ સર્વપાપેભ્યો મુક્તત્વચ ઇવોરગાઃ ।
પરાં બુદ્ધિમવાપ્યેહાપ્યચિન્તા વિગતજ્વરાઃ ॥ ૨૩૮.૨૫॥

સર્વતઃ સ્રોતસં ઘોરાં નદીં લોકપ્રવાહિણીમ્ ।
પઞ્ચેન્દ્રિયગ્રાહવતીં મનઃસંકલ્પરોધસમ્ ॥ ૨૩૮.૨૬॥

લોભમોહતૃણચ્છન્નાં કામક્રોધસરીસૃપામ્ ।
સત્યતીર્થાનૃતક્ષોભાં ક્રોધપઙ્કાં સરિદ્વરામ્ ॥ ૨૩૮.૨૭॥

અવ્યક્તપ્રભવાં શીઘ્રાં કામક્રોધસમાકુલામ્ ।
પ્રતરધ્વં નદીં બુદ્ધ્યા દુસ્તરામકૃતાત્મભિઃ ॥ ૨૩૮.૨૮॥

સંસારસાગરગમાં યોનિપાતાલદુસ્તરામ્ ।
આત્મજન્મોદ્ભવાં તાં તુ જિહ્વાવર્તદુરાસદામ્ ॥ ૨૩૮.૨૯॥

યાં તરન્તિ કૃતપ્રજ્ઞા ધૃતિમન્તો મનીષિણઃ ।
તાં તીર્ણઃ સર્વતો મુક્તો વિધૂતાત્માઽઽત્મવાઞ્શુચિઃ ॥ ૨૩૮.૩૦॥

ઉત્તમાં બુદ્ધિમાસ્થાય બ્રહ્મભૂયાય કલ્પતે ।
ઉત્તીર્ણઃ સર્વસંક્લેશાન્પ્રસન્નાત્મા વિકલ્મષઃ ॥ ૨૩૮.૩૧॥

ભૂયિષ્ઠાનીવ ભૂતાનિ સર્વસ્થાનાન્નિરીક્ષ્ય ચ ।
અક્રુધ્યન્નપ્રસીદંશ્ચ નનૃશંસમતિસ્તથા ॥ ૨૩૮.૩૨॥

તતો દ્રક્ષ્યથ સર્વેષાં ભૂતાનાં પ્રભવાપ્યયાત્ ।
એતદ્ધિ સર્વધર્મેભ્યો વિશિષ્ટં મેનિરે બુધાઃ ॥ ૨૩૮.૩૩॥

ધર્મં ધર્મભૃતાં શ્રેષ્ઠા મનુયઃ સત્યદર્શિનઃ ।
આત્માનો વ્યાપિનો વિપ્રા ઇતિ પુત્રાનુશાસનમ્ ॥ ૨૩૮.૩૪॥

પ્રયતાય પ્રવક્તવ્યં હિતાયાનુગતાય ચ ।
આત્મજ્ઞાનમિદં ગુહ્યં સર્વગુહ્યતમં મહત્ ॥ ૨૩૮.૩૫॥

અબ્રવં યદહં વિપ્રા આત્મસાક્ષિકમઞ્જસા ।
નૈવ સ્ત્રી ન પુમાનેવં ન ચૈવેદં નપુંસકમ્ ॥ ૨૩૮.૩૬॥

અદુઃખમસુખં બ્રહ્મ ભૂતભવ્યભવાત્મકમ્ ।
યથા મતાનિ સર્વાણિ તથૈતાનિ યથા તથા ।
કથિતાનિ મયા વિપ્રા ભવન્તિ ન ભવન્તિ ચ ॥ ૨૩૮.૩૭॥

યથા મતાનિ સર્વાણિ તથૈતાનિ યથા તથા ।
કથિતાનિ મયા વિપ્રા ભવન્તિ ન ભવન્તિ ચ ॥ ૨૩૮.૩૮॥

તત્પ્રીતિયુક્તેન ગુણાન્વિતેન, પુત્રેણ સત્પુત્રદયાન્વિતેન ।
દૃષ્ટ્વા હિતં પ્રીતમના યદર્થં, બ્રૂયાત્સુતસ્યેહ યદુક્તમેતત્ ॥ ૨૩૮.૩૯॥

મુનય ઊચુઃ
મોક્ષઃ પિતામહેનોક્ત ઉપાયાન્નાનુપાયતઃ ।
તમુપાયં યથાન્યાયં શ્રોતુમિચ્છામહે મુને ॥ ૨૩૮.૪૦॥

વ્યાસ ઉવાચ
અસ્માસુ તન્મહાપ્રાજ્ઞા યુક્તં નિપુણદર્શનમ્ ।
યદુપાયેન સર્વાર્થાન્મૃગયધ્વં સદાऽનઘાઃ ॥ ૨૩૮.૪૧॥

ઘટોપકરણે બુદ્ધિર્ઘટોત્પત્તૌ ન સા મતા ।
એવં ધર્માદ્યુપાયાર્થ નાન્યધર્મેષુ કારણમ્ ॥ ૨૩૮.૪૨॥

પૂર્વે સમુદ્રેયઃ પન્થા ન સ ગચ્છતિ પશ્ચિમમ્ ।
એકઃ પન્થા હિ મોક્ષસ્ય તચ્છૃણુધ્વં મમાનઘાઃ ॥ ૨૩૮.૪૩॥

ક્ષમયા ક્રોધમુચ્છિન્દ્યાત્કામં સંકલ્પવર્જનાત્ ।
સત્ત્વસંસેવનાદ્ધીરો નિદ્રામુચ્છેત્તુમર્હતિ ॥ ૨૩૮.૪૪॥

અપ્રમાદાદ્ભયં રક્ષેદ્રક્ષેત્ક્ષેત્રં ચ સંવિદમ્ ।
ઇચ્છાં દ્વેષં ચ કામં ચ ધૈર્યેણ વિનિવર્તયેત્ ॥ ૨૩૮.૪૫॥

નિદ્રાં ચ પ્રતિભાં ચૈવ જ્ઞાનાભ્યાસેન તત્ત્વવિત્ ।
ઉપદ્રવાંસ્તથા યોગી હિતજીર્ણમિતાશનાત્ ॥ ૨૩૮.૪૬॥

લોભં મોહં ચ સંતોષાદ્વિષયાંસ્તત્ત્વદર્શનાત્ ।
અનુક્રોશાદધર્મં ચ જયેદ્ધર્મમુપેક્ષયા ॥ ૨૩૮.૪૭॥

આયત્યા ચ જયેદાશાં સામર્થ્યં સઙ્ગવર્જનાત્ ।
અનિત્યત્વેન ચ સ્નેહં ક્ષુધાં યોગેન પણ્ડિતઃ ॥ ૨૩૮.૪૮॥

કારુણ્યેનાऽऽત્મનાऽऽત્માનં તૃષ્ણાં ચ પરિતોષતઃ ।
ઉત્થાનેન જયેત્તન્દ્રાં વિતર્કં નિશ્ચયાજ્જયેત્ ॥ ૨૩૮.૪૯॥

મૌનેન બહુભાષાં ચ શૌર્યેણ ચ ભયં જયેત્ ।
યચ્છેદ્વાઙ્મનસી બુદ્ધ્યા તાં યચ્છેજ્જ્ઞાનચક્ષુષા ॥ ૨૩૮.૫૦॥

જ્ઞાનમાત્મા મહાન્યચ્છેત્તં યચ્છેચ્છાન્તિરાત્મનઃ ।

તદેતદુપશાન્તેન બોદ્ધવ્યં શુચિકર્મણા ॥ ૨૩૮.૫૧॥

યોગદોષાન્સમુચ્છિદ્ય પઞ્ચ યાન્કવયો વિદુઃ ।
કામં ક્રોધં ચ લોભં ચ ભયં સ્વપ્નં ચ પઞ્ચમમ્ ॥ ૨૩૮.૫૨॥

પરિત્યજ્ય નિષેવેત યથાવદ્યોગસાધનાત્ ।
ધ્યાનમધ્યયનં દાનં સત્યં હ્રીરાર્જવં ક્ષમા ॥ ૨૩૮.૫૩॥

શૌચમાચારતઃ શુદ્ધિરિન્દ્રિયાણાં ચ સંયમઃ ।
એતૈર્વિવર્ધતે તેજઃ પાપ્માનમુપહન્તિ ચ ॥ ૨૩૮.૫૪॥

સિધ્યન્તિ ચાસ્ય સંકલ્પા વિજ્ઞાનં ચ પ્રવર્તતે ।
ધૂતપાતઃ સ તેજસ્વી લઘ્વાહારો જિતેન્દ્રિયઃ ॥ ૨૩૮.૫૫॥

કામક્રોધૌ વશે કૃત્વા નિર્વિશેદ્બ્રહ્મણઃ પદમ્ ।
અમૂઢત્વમસઙ્ગિત્વં કામક્રોધવિવર્જનમ્ ॥ ૨૩૮.૫૬॥

અદૈન્યમનુદીર્ણત્વમનુદ્વેગો હ્યવસ્થિતિઃ ।
એષ માર્ગો હિ મોક્ષસ્ય પ્રસન્નો વિમલઃ શુચિઃ॥

તથા વાક્કાયમનસાં નિયમાઃ કામતોઽવ્યયાઃ ॥ ૨૩૮.૫૭॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે સાંખ્યયોગનિરૂપણં નામ
અષ્ટાત્રિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૩૮॥

---

અધ્યાયઃ ૨૩૯ (૧૩૧)

યોગવિધિનિરૂપણમ્

મુનય ઊચુઃ
સાંખ્યં યોગસ્ય નો વિપ્ર વિશેષં વક્તુમર્હસિ ।
તવ ધર્મજ્ઞ સર્વં હિ વિદિતં મુનિસત્તમ ॥ ૨૩૯.૧॥

વ્યાસ ઉવાચ
સાંખ્યાં સાંખ્યં પ્રશંસન્તિ યોગાન્યોગવિદુત્તમાઃ ।
વદન્તિ કારણૈઃ શ્રેષ્ઠૈઃ સ્વપક્ષોદ્ભવનાય વૈ ॥ ૨૩૯.૨॥

અનીશ્વરઃ કથં મુચ્યેદિત્યેવં મુનિસત્તમાઃ ।
વદન્તિ કારણૈઃ શ્રેષ્ઠં યોગં સમ્યઙ્મનીષિણઃ ॥ ૨૩૯.૩॥

વદન્તિ કારણં વેદં સાંખ્યં સમ્યગ્દ્વિજાતયઃ ।
વિજ્ઞાયેહ ગતીઃ સર્વા વિરક્તો વિષયેષુ યઃ ॥ ૨૩૯.૪॥

ઊર્ધ્વં સ દેહાત્સુવ્યક્તં વિમુચ્યેદિતિ નાન્યથા ।
એતદાહુર્મહાપ્રાજ્ઞાઃ સાંખ્યં વૈ મોક્ષદર્શનમ્ ॥ ૨૩૯.૫॥

સ્વપક્ષે કારણં ગ્રાહ્યં સમર્થં વચનં હિતમ્ ।
શિષ્ટાનાં હિ મતં ગ્રાહ્યં ભવદ્ભિઃ શિષ્ટસંમતૈઃ ॥ ૨૩૯.૬॥

પ્રત્યક્ષં હેતવો યોગાઃ સાંખ્યાઃ શાસ્ત્રવિનિશ્ચયાઃ ।
ઉભે ચૈતે તત્ત્વે સમવેતે દ્વિજોત્તમાઃ ॥ ૨૩૯.૭॥

ઉભે ચૈતે મતે જ્ઞાતે મુનીન્દ્રાઃ શિષ્ટસંમતે ।
અનુષ્ઠિતે યથાશાસ્ત્રં નયેતાં પરમાં ગતિમ્ ॥ ૨૩૯.૮॥

તુલ્યં શૌચં તયોર્યુક્તં દયા ભૂતેષુ ચાનઘાઃ ।
વ્રતાનાં ધારણં તુલ્યં દર્શનં ત્વસમં તયોઃ ॥ ૨૩૯.૯॥

મુનય ઊચુઃ
યદિ તુલ્યં વ્રતં શૌચં દયા ચાત્ર મહામુને ।
તુલ્યં તદ્દર્શનં કસ્માત્તન્નૌ બ્રૂહિ દ્વિજોત્તમ ॥ ૨૩૯.૧૦॥

વ્યાસ ઉવાચ
રાગં મોહં તથા સ્નેહં કામં ક્રોધં ચ કેવલમ્ ।
યોગાસ્થિરોદિતાન્દોષાન્પઞ્ચૈતાન્પ્રાપ્નુવન્તિ તાન્ ॥ ૨૩૯.૧૧॥

યથા વાઽનિમિષાઃ સ્થૂલં જાલં છિત્ત્વા પુનર્જલમ્ ।
પ્રાપ્નુયુર્વિમલં માર્ગં વિમુક્તાઃ સર્વબન્ધનૈઃ ॥ ૨૩૯.૧૨॥

તથૈવ વાગુરાં છિત્ત્વા બલવન્તો યથા મૃગાઃ ।
પ્રાપ્નુયુર્વિમલં માર્ગં વિમુક્તાઃ સર્વબન્ધનૈઃ ॥ ૨૩૯.૧૩॥

લોભજાનિ તથા વિપ્રા બન્ધનાનિ બલાન્વિતઃ ।
છિત્ત્વા યોગાત્પરં માર્ગં ગચ્છન્તિ વિમલં શુભમ્ ॥ ૨૩૯.૧૪॥

અચલાસ્ત્વાવિલા વિપ્રા વાગુરાસુ તથાઽપરે ।
વિનશ્યન્તિ ન સંદેહસ્તદ્વદ્યોગબલાદૃતે ॥ ૨૩૯.૧૫॥

બલહીનાશ્ચ વિપ્રેન્દ્રા યથા જાલં ગતા દ્વિજાઃ ।

બન્ધં ન ગચ્છન્ત્યનઘા યોગાસ્તે તુ સુદુર્લભાઃ ॥ ૨૩૯.૧૬॥

યથા ચ શકુનાઃ સૂક્ષ્મં પ્રાપ્ય જાલમરિન્દમાઃ ।
તત્રાશક્તા વિપદ્યન્તે મુચ્યન્તે તુ બલાન્વિતાઃ ॥ ૨૩૯.૧૭॥

કર્મજૈર્બન્ધનૈર્બદ્ધાસ્તદ્વદ્યોગપરા દ્વિજાઃ ।
અબલા ન વિમુચ્યન્તે મુચ્યન્તે ચ બલાન્વિતાઃ ॥ ૨૩૯.૧૮॥

અલ્પકશ્ચ યથા વિપ્રા વહ્નિઃ શામ્યતિ દુર્બલઃ ।
આક્રાન્ત ઇન્ધનૈઃ સ્થૂલૈસ્તદ્વદ્યોગબલઃ સ્મૃતઃ ॥ ૨૩૯.૧૯॥

સ એવ ચ તદા વિપ્રા વહ્નિર્જાતબલઃ પુનઃ ।
સમીરણગતઃ કૃત્સ્નાં દહેત્ક્ષિપ્રં મહીમિમામ્ ॥ ૨૩૯.૨૦॥

તત્ત્વજ્ઞાનબલો વિપ્રા વહ્નિર્જાતબલઃ પુનઃ ।
સમીરણગતઃ કૃત્સ્નાં દહેત્ક્ષિપ્રં મહીમિમામ્ ॥ ૨૩૯.૨૧॥

દુર્બલશ્ચ યથા વિપ્રાઃ સ્રોતસા હ્રિયતે નરઃ ।
બલહીનસ્તથા યોગી વિષયૈર્હ્રિયતે ચ સઃ ॥ ૨૩૯.૨૨॥

તદેવ તુ યથા સ્રોતસા વિષ્કમ્ભયતિ વારણઃ ।
તદ્વદ્યોગબલં લબ્ધ્વા ન ભવેદ્વિષયૈર્હૃતઃ ॥ ૨૩૯.૨૩॥

વિશન્તિ વા વશાદ્વાઽથ યોગાદ્યોગબલન્વિતાઃ ।
પ્રજાપતીન્મનૂન્સર્વાન્મહાભૂતાનિ ચેશ્વરાઃ ॥ ૨૩૯.૨૪॥

ન યમો નાન્તકઃ ક્રુદ્ધો ન મૃત્યુર્ભીમવિક્રમઃ ।
વિશન્તે તદ્વિજાઃ સર્વે યોગસ્યામિતતેજસઃ ॥ ૨૩૯.૨૫॥

આત્મનાં ચ સહસ્રાણિ બહૂનિ દ્વિજસત્તમાઃ ।
યોગં કુર્યાદ્બલં પ્રાપ્ય તૈશ્ચ સર્વૈર્મહીં ચરેત્ ॥ ૨૩૯.૨૬॥

પ્રાપ્નુયાદ્વિષયાન્કશ્ચિત્પુનશ્ચોગ્રં તપશ્ચરેત્ ।
સંક્ષિપ્યેચ્ચ પુનર્વિપ્રાઃ સૂર્યસ્તેજોગુણાનિવ ॥ ૨૩૯.૨૭॥

બલસ્થસ્ય હિ યોગસ્ય બલાર્થં મુનિસત્તમાઃ ।
વિમોક્ષપ્રભવં વિષ્ણુમુપપન્નમસંશયમ્ ॥ ૨૩૯.૨૮॥

બલાનિ યોગપ્રોક્તાનિ મયૈતાનિ દ્વિજોત્તમાઃ ।
નિદર્શનાર્થં સૂક્ષ્માણિ વક્ષ્યામિ ચ પુનર્દ્વિજાઃ ॥ ૨૩૯.૨૯॥

આત્મનશ્ચ સમાધાને ધારણાં પ્રતિ વા દ્વિજાઃ ।
નિદર્શનાનિ સૂક્ષ્માણિ સૂક્ષ્માણિ શ્રૃણુધ્વં મુનિસત્તમાઃ ॥ ૨૩૯.૩૦॥

અપ્રમત્તો યથા ધન્વી લક્ષ્યં હન્તિ સમાહિતઃ ।
યુક્તઃ સમ્યક્તથા યોગી મોક્ષં પ્રાપ્નોત્યસંશયમ્ ॥ ૨૩૯.૩૧॥

સ્નેહપાત્રે યથા પૂર્ણે મન આધાય નિશ્ચલમ્ ।
પુરુષો યુક્ત આરોહેત્સોપાનં યુક્તમાનસઃ ॥ ૨૩૯.૩૨॥

મુક્તસ્તથાઽયમાત્માનં યોગં તદ્વત્સુનિશ્ચલમ્ ।
કરોત્યમલમાત્માનં ભાસ્કરોપમદર્શને ॥ ૨૩૯.૩૩॥

યથા ચ નાવં વિપ્રેન્દ્રાઃ કર્ણધારઃ સમાહિતઃ ।
મહાર્ણવગતાં શીઘ્રં નયેદ્વિપ્રાંસ્તુ પત્તનમ્ ॥ ૨૩૯.૩૪॥

તદ્વદાત્મસમાધાનં યુક્તો યોગેન યોગવિત્ ।
દુર્ગમં સ્થાનમાપ્નોતિ હિત્વા દેહમિમં દ્વિજાઃ ॥ ૨૩૯.૩૫॥

સારથિશ્ચ યથા યુક્તઃ સદશ્વાન્સુસમાહિતઃ ।
પ્રાપ્નોત્યાશુ પરં સ્થાનં લક્ષ્યમુક્ત ઇવાઽઽશુગઃ ॥ ૨૩૯.૩૬॥

તથૈવ ચ દ્વિજા યોગી ધારણાસુ સમાહિતઃ ।
પ્રાપ્નોત્યશુ પરં સ્થાનં લક્ષ્યમુક્ત ઇવાઽઽશુગઃ ॥ ૨૩૯.૩૭॥

આવિશ્યાઽઽત્મનિ ચાઽઽત્માનં યોઽવતિષ્ઠતિ સોઽચલઃ ।
પાશં વહત્વે મીનાનાં પદમાપ્નોતિ સોઽજરમ્ ॥ ૨૩૯.૩૮॥

નાભ્યાં શીર્ષે ચ કુક્ષૌ ચ હૃદિ વક્ષસિ પાર્શ્વયોઃ ।
દર્શને શ્રવણે વાઽપિ ઘ્રાણે ચામિતવિક્રમઃ ॥ ૨૩૯.૩૯॥

સ્થાનેષ્વેતેષુ યો યોગી મહાવ્રતસમાહિતઃ ।
આત્મના સૂક્ષ્મમાત્માનં યુઙ્ક્તે સમ્યગ્દ્વિજોત્તમાઃ ॥ ૨૩૯.૪૦॥

સુશીઘ્રમચલપ્રખ્યં કર્મ દગ્ધ્વા શુભાશુભમ્ ।
ઉત્તમં યોગમાસ્થાય યદીચ્છતિ વિમુચ્યતે ॥ ૨૩૯.૪૧॥

મુનય ઊચુઃ
આહારાન્કીદૃશાન્કૃત્વા કાનિ જિત્વા ચ સત્તમ ।

યોગી બલમવાપ્નોતિ તદ્ભવાન્વક્તુમર્હતિ ॥ ૨૩૯.૪૨॥

વ્યાસ ઉવાચ
કણાનાં ભક્ષણે યુક્તઃ પિણ્યાકસ્ય ચ ભો દ્વિજાઃ ।
સ્નેહાનાં વર્જને યુક્તો યોગી બલમવાપ્નુયાત્ ॥ ૨૩૯.૪૩॥

ભુઞ્જાનો યાવકં રૂક્ષં દીર્ઘકાલં દ્વિજોત્તમાઃ ।
એકાહારી વિશુદ્ધાત્મા યોગી બલમવાપ્નુયાત્ ॥ ૨૩૯.૪૪॥

પક્ષાન્માસાનૃતૂંશ્ચિત્રાન્સંચરંશ્ચ ગુહાસ્તથા ।
અપઃ પીત્વા પયોમિશ્રા યોગી બલમાવાપ્નુયાત્ ॥ ૨૩૯.૪૫॥

અખણ્ડમપિ વા માસં સતતં મુનિસત્તમાઃ ।
ઉપોષ્ય સમ્યક્શુદ્ધાત્મા યોગી બલમવાપ્યનુયાત્ ॥ ૨૩૯.૪૬॥

કામં જિત્વા તથા ક્રોધં શીતોષ્ણં વર્ષમેવ ચ ।
ભયં શોકં તથા સ્વાપં પૌરુષીન્વિષયાંસ્તથા ॥ ૨૩૯.૪૭॥

અરતિં દુર્જયાં ચૈવ ઘોરાં દૃષ્ણા ચ ભો દ્વિજાઃ ।
સ્પર્શં નિદ્રાં તથા તન્દ્રાં દુર્જયાં મુનિસત્તમાઃ ॥ ૨૩૯.૪૮॥

દીપયન્તિ મહાત્માનં સૂક્ષ્મમાત્માનમાત્મના ।
વીતરાગા મહાપ્રાજ્ઞા ધ્યાનાધ્યયનસમ્પદા ॥ ૨૩૯.૪૯॥

દુર્ગસ્ત્વેષ મતઃ પન્થા બ્રાહ્મણાનાં વિપશ્ચિતામ્ ।
યઃ કશ્ચિદ્વ્રજતિ ક્ષિપ્રં ક્ષેમેણ મુનિપુંગવાઃ ॥ ૨૩૯.૫૦॥

યથા કશ્ચિદ્વનં ઘોરં બહુસર્પસરીસૃપમ્ ।
શ્વભ્રવત્તોયહીનં ચ દુર્ગમં બહુકણ્ટકમ્ ॥ ૨૩૯.૫૧॥

અભક્તમટવીપ્રાયં દાવદગ્ધમહીરુહમ્ ।
પન્થાનં તસ્કરાકીર્ણં ક્ષેમેણાભિપતેત્તથા ॥ ૨૩૯.૫૨॥

યોગમાર્ગં સમાસાદ્ય યઃ કશ્ચિદ્વ્રજતે દ્વિજઃ ।
ક્ષેમેણોપરમેન્માર્ગાદ્બહુદોષોઽપિ સંમતઃ ॥ ૨૩૯.૫૩॥

આસ્થેયં ક્ષુરધારાસુ નિશિતાસુ દ્વિજોત્તમાઃ ।
ધારણા સા તુ યોગસ્ય દુર્ગેયમકૃતાત્મભિઃ ॥ ૨૩૯.૫૪॥

વિષમા ધારણા વિપ્રા યાન્તિ વૈન શુભાં ગતિમ્ ।

નેતૃહીના યથા નાવઃ પુરુષાણાં તુ વૈ દ્વિજાઃ ॥ ૨૩૯.૫૫॥

યસ્તુ તિષ્ઠતિ યોગાધૌ ધારણાસુ યથાવિધિ ।
મરણં જન્મદુઃખિત્વં સુખિત્વં સ વિશિષ્યતે ॥ ૨૩૯.૫૬॥

નાનાશાસ્ત્રેષુ નિયતં નાનામુનિનિષેવિતમ્ ।
પરં યોગસ્ય પન્થાનં નિશ્ચિતં તં દ્વિજાતિષુ ॥ ૨૩૯.૫૭॥

પરં હિ તદ્બ્રહ્મમયં મુનીન્દ્રા, બ્રાહ્મણમીશં વરદં ચ વિષ્ણુમ્ ।
ભવં ચ ધર્મં ચ મહાનુભાવં યદ્બ્રહ્મપુત્રાન્સુમહાનુભાવાન્ ॥ ૨૩૯.૫૮॥

તમશ્ચ કષ્ટં સુમહદ્રજશ્ચ, સત્ત્વં ચ શુદ્ધં પ્રકૃતિં પરાં ચ ।
સિદ્ધિં ચ દેવીં વરુણસ્ય પત્નીં, તેજશ્ચ કૃત્સ્નં સુમહચ્ચ ધૈર્યમ્॥

૨૩૯.૫૯ ॥

તારાધિપં ખે વિમલં સુતારં, વિશ્વાંશ્ચ દેવાનુરગાન્પિતૃંશ્ચ ।
શૈલાંશ્ચ કૃત્સ્નાનુદધીંશ્ચ વાઽચલાન્નદીશ્ચ સર્વાઃ સનગાંશ્ચ
નાગાન્ ॥ ૨૩૯.૬૦॥

સાધ્યાંસ્તથા યક્ષગણાન્દિશશ્ચ, ગન્ધર્વસિદ્ધાન્પુરુષાન્સ્ત્રિયશ્ચ ।
પરસ્પરં પ્રાપ્ય મહાન્મહાત્મા વિશેત યોગી નચિરાદ્વિમુક્તઃ ॥ ૨૩૯.૬૧॥

કથા ચ યા વિપ્રવરાઃ પ્રસક્તા, દૈવે મહાવીર્યમતૌ શુભેયમ્ ।
યોગાન્સ સર્વાનનુભૂય મર્ત્યા, નારાયણં તં દ્રુતમાપ્નુવન્તિ ॥ ૨૩૯.૬૨॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વ્યાસર્ષિસંવાદે યોગવિધિનિરૂપણં નામ
એકોનચત્વારિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૩૯॥

---

અધ્યાયઃ ૨૪૦ (૧૩૨)

સાંખ્યવિધિનિરૂપણમ્

મુનય ઊચુઃ

સમ્યક્ક્રિયેયં વિપ્રેન્દ્ર વર્ણિતા શિષ્ટસંમતા ।
યોગમાર્ગો યથાન્યાયં શિષ્યાયેહ હિતષિણા ॥ ૨૪૦.૧॥

સાંખ્યે ત્વિદાનીં ધર્મસ્ય વિધિં પ્રબ્રૂહિ તત્ત્વતઃ ।
ત્રિષુ લોકેષુ યજ્જ્ઞાનં સર્વં તદ્વિદિતં હિ તે ॥ ૨૪૦.૨॥

વ્યાસ ઉવાચ

શ્રૃણુધ્વં મુનયઃ સર્વમાખ્યાનં વિદિતાત્મનામ્ ।
વિહિતં યતિભિર્વૃદ્ધૈઃ કપિલાદિભિરીશ્વરૈઃ ॥ ૨૪૦.૩॥

યસ્મિન્સુવિભ્રામાઃ કેચિદ્દૃશ્યન્તે મુનિસત્તમાઃ ।
ગુણાશ્ચ યસ્મિન્બહવો દોષહાનિશ્ચ કેવલા ॥ ૨૪૦.૪॥

જ્ઞાનેન પરિસંખ્યાય સદોષાન્વિષયાન્દ્વિજાઃ ।
માનુષાન્દુર્જયાન્કૃત્સ્નાન્પૈશાચાન્વિષયાંસ્તથા ॥ ૨૪૦.૫॥

વિષયાનૌરગાઞ્જ્ઞાત્વા ગન્ધર્વવિષયાંસ્તથા ।
પિતૃણાં વિષયાઞ્જ્ઞાત્વા તિર્યક્ત્વં ચરતાં દ્વિજાઃ ॥ ૨૪૦.૬॥

સુપર્ણવિષયાઞ્જ્ઞાત્વા મરુતાં વિષયાંસ્તથા ।
મહર્ષિવિષયાંશ્ચૈવ રાજર્ષિવિષયાંસ્તથા ॥ ૨૪૦.૭॥

આસુરાન્વિષયાઞ્જ્ઞાત્વા વૈશ્વદેવાંસ્તથૈવ ચ ।
દેવર્ષિવિષયાઞ્જ્ઞાત્વા યોગાનામપિ વૈ પરાન્ ॥। ૨૪૦.૮॥

વિષયાંશ્ચ પ્રમાણસ્ય બ્રહ્મણો વિષયાંતથા ।
આયુષશ્ચ પરં કાલં લોકૈર્વિજ્ઞાય તત્ત્વતઃ ॥ ૨૪૦.૯॥

સુખસ્ય ચ પરં કાલં વિજ્ઞાય મુનિસત્તમાઃ ।
પ્રાપ્તકાલે ચ યદ્દુઃખં પતતાં વિષયૈષિણામ્ ॥ ૨૪૦.૧૦॥

તિર્યક્ત્વે પતતાં વિપ્રાસ્તથૈવ નરકેષુ યત્ ।
સ્વર્ગસ્ય ચ ગુણાઞ્જ્ઞાત્વા દોષાન્સર્વાંશ્ચ ભો દ્વિજાઃ ॥ ૨૪૦.૧૧॥

વેદવાદે ચ યે દોષા ગુણા યે ચાપિ વૈદિકાઃ ।
જ્ઞાનયોગે ચ યે દોષા જ્ઞાનયોગે ચ યે ગુણાઃ ॥ ૨૪૦.૧૨॥

સાંખ્યજ્ઞાને ચ યે દોષાંસ્તથૈવ ચ ગુણાં તથા ।
ષડ્ગુણં ચ નભો જ્ઞાત્વા તમશ્ચ ત્રિગુણં મહત્ ॥ ૨૪૦.૧૩॥

તમશ્ચાષ્ટગુણં જ્ઞાત્વા બુદ્ધિં સપ્તગુણાં તથા ।
ષડ્ગુણં ચ નભો જ્ઞાત્વા તપશ્ચ ત્રિગુણં મહત્ ॥ ૨૪૦.૧૪॥

દ્વિગુણં ચ રજો જ્ઞાત્વા સત્ત્વં ચૈકગુણં પુનઃ ।
માર્ગં વિજ્ઞાય તત્ત્વેન પ્રલયપ્રેક્ષણેન તુ ॥ ૨૪૦.૧૫॥

જ્ઞાનવિજ્ઞાનસમ્પન્નાઃ કારણૈર્ભાવિતાત્મભિઃ ।
પ્રાપ્નુવન્તિ શુભં મોક્ષં સૂક્ષ્મા ઇવ નભઃ પરમ્ ॥ ૨૪૦.૧૬॥

રૂપેણ દૃષ્ટિં સંયુક્તાં ઘ્રાણં ગન્ધગુણેન ચ ।
શબ્દગ્રાહ્યં તથા શ્રોત્રં જિહ્વાં રસગુણેન ચ ॥ ૨૪૦.૧૭॥

ત્વચં સ્પર્શં તથા શક્યં વાયું ચૈવ તદાશ્રિતમ્ ।
મોહં તમસિ સંયુક્તં લોભં મોહેષુ સંશ્રિતાઃ ॥ ૨૪૦.૧૮॥

વિષ્ણું ક્રાન્તે બલે શક્રં કોષ્ઠે સક્તં તથાઽનલમ્ ।
અપ્સુ દેવીં સમાયુક્તામાપસ્તેજસિ સંશ્રિતાઃ ॥ ૨૪૦.૧૯॥

તેજો વાયૌ તુ સંયુક્તં વાયું નભસિ ચાઽઽશ્રિતમ્ ।
નભો મહતિ સંયુક્તં તમો મહસિ સંસ્થિતમ્ ॥ ૨૪૦.૨૦॥

રજઃ સત્ત્વં તથા સક્તં સત્ત્વં સક્તં તથાઽઽત્મનિ ।
સક્તમાત્માનમીશે ચ દેવે નારાયણે તથા ॥ ૨૪૦.૨૧॥

દેવં મોક્ષે ચ સંયુક્તં તતો મોક્ષં ચ ન ક્વચિત્ ।
જ્ઞાત્વા સત્ત્વગુણં દેહં વૃતં ષોડશભિર્ગુણૈઃ ॥ ૨૪૦.૨૨॥

સ્વભાવં ભાવનાં ચૈવ જ્ઞાત્વા દેહસમાશ્રિતામ્ ।
મધ્યસ્થમિવ ચાઽઽત્માનં પાપં યસ્મિન્ન વિદ્યત ॥ ૨૪૦.૨૩॥

દ્વિતીયં કર્મ વૈ જ્ઞાત્વા વિપ્રેન્દ્રા વિષ્યૈષિણામ્ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થાંશ્ચ સર્વાનાત્મનિ સંશ્રિતાન્ ॥ ૨૪૦.૨૪॥

દુર્લભત્વં ચ મોક્ષસ્ય વિજ્ઞાય શ્રુતિપૂર્વકમ્ ।
પ્રાણાપાનૌ સમાનં ચ વ્યાનોદાનૌ ચ તત્ત્વતઃ ॥ ૨૪૦.૨૫॥

આદ્યં ચૈવાનિલં જ્ઞાત્વા પ્રભવં ચાનિલં પુનઃ ।
સપ્તધા તાંસ્તથા શેષાસપ્તધા વિધિવત્પુનઃ ॥ ૨૪૦.૨૬॥

પ્રજાપતીનૃષીંશ્ચૈવ સર્ગાંશ્ચ સુબહૂન્વરાન્ ।
સપ્તર્ષીંશ્ચ બહૂઞ્જ્ઞાત્વા રાજર્ષીંશ્ચ પરંતપાન્ ॥ ૨૪૦.૨૭॥

સુરર્ષીન્મરુતશ્ચાન્યાન્બ્રહ્મર્ષીન્સૂર્યસંનિભાન્ ।
ઐશ્વર્યાચ્ચ્યાવિતાન્દૃષ્ટ્વા કાલેન મહતા દ્વિજાઃ ॥ ૨૪૦.૨૮॥

મહતાં ભૂતસંઘાનાં શ્રુત્વા નાશં ચ ભો દ્વિજાઃ ।

ગતિં વાચાં શુભાં જ્ઞાત્વા અર્ચાર્હાઃ પાપકર્મણામ્ ॥ ૨૪૦.૨૯॥

વૈતરણ્યાં ચ યદ્દુઃખં પતિતાનાં યમક્ષયે ।
યોનિષુ ચ વિચિત્રાસુ સંચારાનશુભાંસ્તથા ॥ ૨૪૦.૩૦॥

જઠરે ચાશુભે વાસં શોણિતોદકભાજને ।
શ્લેષ્મમૂત્રપુરીષે ચ તીવ્રગન્ધસમન્વિતે ॥ ૨૪૦.૩૧॥

શુક્રશોણિતસંઘાતે મજ્જાસ્નાયુપરિગ્રહે ।
શિરશતસમાકીર્ણે નવદ્વારે પુરેઽથ વૈ ॥ ૨૪૦.૩૨॥

વિજ્ઞાય હિતમાત્માનં યોગાંશ્ચ વિવિધાન્દ્વિજાઃ ।
તામસાનાં ચ જન્તૂનાં રમણીયાનૃતાત્મનામ્ ॥ ૨૪૦.૩૩॥

સાત્ત્વિકાનાં ચ જન્તૂનાં કુત્સિતં મુનિસત્તમાઃ ।
ગર્હિતં મહાતામર્થે સાંખ્યાનાં વિદિતાત્મનામ્ ॥ ૨૪૦.૩૪॥

ઉપપ્લવાંસ્તથા ઘોરાઞ્શશિનસ્તેજસ્તથા ।
તારાણાં પતનં દૃષ્ટ્વા નક્ષત્રાણાં ચ પર્યયમ્ ॥ ૨૪૦.૩૫॥

દ્વંદ્વાનાં વિપ્રયોગં ચ વિજ્ઞાય કૃપણં દ્વિજાઃ ।
અન્યોન્યભક્ષણં દૃષ્ટ્વા ભૂતાનામપિ ચાશુભમ્ ॥ ૨૪૦.૩૬॥

બાલ્યે મોહં ચ વિજ્ઞાય પક્ષદેહસ્ય ચાશુભમ્ ।
રાગં મોહં ચ સમ્પ્રાપ્તં ક્વચિત્સત્ત્વં સમાશ્રિતમ્ ॥ ૨૪૦.૩૭॥

સહસ્રેષુ નરઃ કશ્ચિન્મોક્ષબુદ્ધિં સમાશ્રિતઃ ।
દુર્લભત્વં ચ મોક્ષસ્ય વિજ્ઞાનં શ્રુતિપૂર્વકમ્ ॥ ૨૪૦.૩૮॥

બહુમાનમલબ્ધેષુ લબ્ધે મધ્યસ્થતાં પુનઃ ।
વિષયાણાં ચ દૌરાત્મ્યં વિજ્ઞાય ચ પુનર્દ્વિજાઃ ॥ ૨૪૦.૩૯॥

ગતાસૂનાં ચ સત્ત્વાનાં દેહાન્ભિત્ત્વા તથા શુભાન્ ।
વાસં કુલેષુ જન્તૂનાં મરણાય ધૃતાત્મનામ્ ॥ ૨૪૦.૪૦॥

સાત્ત્વિકાનાં ચ જન્તૂનાં દુઃખં વિજ્ઞાય ભો દ્વિજાઃ ।
બ્રહ્મઘ્નાનાં ગતિં જ્ઞાત્વા પતિતાનાં સુદારુણામ્ ॥ ૨૪૦.૪૧॥

સુરાપાને ચ સક્તાનાં બ્રાહ્મણાનાં દુરાત્મનામ્ ।
ગુરુદારપ્રસક્તાનાં ગતિં વિજ્ઞાય ચાશુભામ્ ॥ ૨૪૦.૪૨॥

જનનીષુ ચ વર્તન્તે યેન સમ્યગ્દ્વિજોત્તમાઃ ।
સદેવકેષુ લોકેષુ યેન વર્તન્તિ માનવાઃ ॥ ૨૪૦.૪૩॥

તેન જ્ઞાનેન વિજ્ઞાય ગતિં ચાશુભકર્મણામ્ ।
તિર્યગ્યોનિગતાનાં ચ વિજ્ઞાય ચ ગતીઃ પૃથક્ ॥ ૨૪૦.૪૪॥

વેદવાદાંસ્તથા ચિત્રાનૃતૂનાં પર્યયાંસ્તથા ।
ક્ષયં સંવત્સરાણાં ચ માસાનાં ચ ક્ષયં તથા ॥ ૨૪૦.૪૫॥

પક્ષક્ષયં તથા દૃષ્ટ્વા દિવસાનાં ચ સંક્ષયમ્ ।
ક્ષય સંવત્સરાણાં ચ માસાનાં ચ ક્ષયં તથા ॥ ૨૪૦.૪૬॥

વૃદ્ધિં દૃષ્ટ્વા સમુદ્રાણાં ક્ષયં તેષાં તથા પુનઃ ।
ક્ષયં ધનાનાં દૃષ્ટ્વા ચ પુનર્વૃદ્ધિં તથૈવ ચ ॥ ૨૪૦.૪૭॥

સંયોગાનાં તથા દૃષ્ટ્વા યુગાનાં ચ વિશેષતઃ ।
દેહવૈક્લવ્યતાં ચૈવ સમ્યગ્વિજ્ઞાય તત્ત્વતઃ ॥ ૨૪૦.૪૮॥

આત્મદોષાંશ્ચ વિજ્ઞાય સર્વાનાત્મનિ સંસ્થિતાન્ ।
સ્વદેહાદુત્થિતાન્ગન્ધાંસ્તથા વિજ્ઞાય ચાશુભામ્ ॥ ૨૪૦.૪૯॥

મુનય ઊચુઃ
કાનુત્પાતભવાન્દોષાન્પશ્યતિ બ્રહ્મવિત્તમ ।
એતં નઃ સંશયં કૃત્સ્નં વક્તુમર્હસ્યશેષતઃ ॥ ૨૪૦.૫૦॥

વ્યાસ ઉવાચ
પઞ્ચ દોષાન્દ્વિજા દેહે પ્રવદન્તિ મનીષિણઃ ।
માર્ગજ્ઞાઃ કાપિલાઃ સાંખ્યાઃ શ્રૃણુધ્વં મુનિસત્તમાઃ ॥ ૨૪૦.૫૧॥

કામક્રોધૌ ભયં નિદ્રા પઞ્ચમઃ શ્વાસ ઉચ્યતે ।
એતે દોષાઃ શરીરેષુ દૃશ્યન્તે સર્વદેહિનામ્ ॥ ૨૪૦.૫૨॥

છિન્દન્તિ ક્ષમયા ક્રોધં કામં સંકલ્પવર્જનાત્ ।
સત્ત્વસંસેવનાન્નિદ્રામપ્રમાદાદ્ભયં તથા ॥ ૨૪૦.૫૩॥

છિન્દન્તિ પઞ્ચમં શ્વાસમલ્પાહારતયા દ્વિજાઃ ।
ગુણાન્ગુણશતૈર્જ્ઞાત્વા દોષાન્દોષશતૈરપિ ॥ ૨૪૦.૫૪॥

હેતૂન્હેતુશતૈશ્ચિત્રૈશ્ચિત્રાન્વિજ્ઞાય તત્ત્વતઃ ।
અપાં ફેનોપમં લોકં વિષ્ણોર્માયાશતૈઃ કૃતમ્ ॥ ૨૪૦.૫૫॥

ચિત્રભિત્તિપ્રતીકાશં નલસારમનર્થકમ્ ।
તમઃ સંભ્રમિતં દૃષ્ટ્વા વર્ષબુદ્બુદસંનિભમ્ ॥ ૨૪૦.૫૬॥

નાશપ્રાયં સુખાધાનં નાશોત્તરમહાભયમ્ ।
રજસ્તમસિ સંમગ્નં પઙ્કે દ્વિપમિવાવશમ્ ॥ ૨૪૦.૫૭॥

સાંખ્યા વિપ્રા મહાપ્રાજ્ઞાસ્ત્યક્ત્વા સ્નેહં પ્રજાકૃતમ્ ।
જ્ઞાનજ્ઞેયેન સાંખ્યેન વ્યાપિના મહતા દ્વિજાઃ ॥ ૨૪૦.૫૮॥

રાજસાનશુભાન્ગન્ધાંસ્તામસાંશ્ચ તથાવિધાન્ ।
પુણ્યાંશ્ચ સાત્ત્વિકાન્ગન્ધાન્સ્પર્શજાન્દેહસંશ્રિતાન્ ॥ ૨૪૦.૫૯॥

છિત્ત્વાઽઽમજ્ઞાનશસ્ત્રેણ તપોદણ્ડેન સત્તમાઃ ।
તતો દુઃખાદિકં ઘોરં ચિન્તાશોકમહાહ્રદમ્ ॥ ૨૪૦.૬૦॥

વ્યાધિમત્યુમહાઘોરં મહાભયમહોરગમ્ ।
તતઃ કૂર્મં રજોમીનં પ્રજ્ઞાયા સંતરન્ત્યુત ॥ ૨૪૦.૬૧॥

સ્નેહપઙ્કં જરાદુર્ગં સ્પર્શદ્વીપં દ્વિજોત્તમાઃ ।
કર્માગાધં સત્યતીરં સ્થિતં વ્રતમનીષિણઃ ॥ ૨૪૦.૬૨॥

હર્ષસંઘમહાવેગં નાનારસસમાકુલમ્ ।
નાનાપ્રીતિમહારત્નં દુઃખજ્વરસમીરિતમ્ ॥ ૨૪૦.૬૩॥

શોકતૃષ્ણામહાવર્તં તીક્ષ્ણવ્યાધિમહારુજમ્ ।
અસ્થિસંઘાતસંઘટ્ટં શ્લેષ્મયોગં દ્વિજોત્તમાઃ ॥ ૨૪૦.૬૪॥

દાનમુક્તાકરં ઘોરં શોણિતોદ્ગારવિદ્રુમમ્ ।
હસિતોત્ક્રુષ્ટનિર્ઘોષં નાનાજ્ઞાસુદુષ્કરમ્ ॥ ૨૪૦.૬૫॥

રોદનાશ્રુમલક્ષારં સઙ્ગયોગપરાયણમ્ ।
પ્રલબ્ધ્વા જન્મલોકો યં પુત્રબાન્ધવપત્તનમ્ ॥ ૨૪૦.૬૬॥

અહિંસાસત્યમર્યાદં પ્રાણયોગમયોર્મિલમ્ ।
વૃન્દાનુગામિનં ક્ષીરં સર્વભૂતપયોદધિમ્ ॥ ૨૪૦.૬૭॥

મોક્ષદુર્લભવિષયં વાડવાસુખસાગરમ્ ।

તરન્તિ યતયઃ સિદ્ધા જ્ઞાનયોગેન ચાનઘાઃ ॥ ૨૪૦.૬૮॥

તીર્ત્વા ચ દુસ્તરં જન્મ વિશન્તિ વિમલં નભઃ ।
તતસ્તાન્સુકૃતીઞ્જ્ઞાત્વા સૂર્યો વહતિરશ્મિભિઃ ॥ ૨૪૦.૬૯॥

પદ્મતન્તુવદાવિશ્ય પ્રવહન્વિષયાન્દ્વિજાઃ ।
તત્ર તાન્પ્રવહો વાયુઃ પ્રતિગૃહ્ણાતિ ચાનઘાઃ ॥ ૨૪૦.૭૦॥

વીતરાગાન્યતીન્સિદ્ધાન્વીર્યયુક્તાંસ્તપોધનાન્ ।
સૂક્ષ્મઃ શીતઃ સુગન્ધશ્ચ સુખસ્પર્શશ્ચ ભો દ્વિજાઃ ॥ ૨૪૦.૭૧॥

સપ્તાનાં મરુતાં શ્રેષ્ઠો લોકાન્ગચ્છતિ યઃ શુભાન્ ।
સ તાન્વહતિ વિપ્રેન્દ્રા નભસઃ પરમાં ગતિમ્ ॥ ૨૪૦.૭૨॥

નભો વહતિ લોકેશાન્રજસઃ પરમાં ગતિમ્ ।
રજો વહતિ વિપ્રેન્દ્રાઃ સત્ત્વસ્ય પરમાંગતિમ્ ॥ ૨૪૦.૭૩॥

સત્ત્વં વહતિ શુદ્ધાત્મા પરં નારાયણં પ્રભુમ્ ।
પ્રભુર્વહતિ શુદ્ધાત્મા પરમાત્માનમાત્મના ॥ ૨૪૦.૭૪॥

પરમાત્માનમાસાદ્ય તદ્ભૂતા યતયોઽમલાઃ ।
અમૃતત્વાય કલ્પન્તે ન નિવર્તન્તિ ચ દ્વિજાઃ ॥ ૨૪૦.૭૫॥

પરમા સા ગતિર્વિપ્રા નિર્દ્વન્દ્વાનાં મહાત્મનામ્ ।
સત્યાર્જવરતાનાં વૈ સર્વભૂતદયાવતામ્ ॥ ૨૪૦.૭૬॥

મુનય ઊચુઃ
સ્થાનમુત્તમમાસાદ્ય ભગવન્તં સ્થિરવ્રતાઃ ।
આજન્મમરણં વા તે રમન્તે તત્ર વા ન વા ॥ ૨૪૦.૭૭॥

યદત્ર તથ્યં તત્ત્વં નો યથાવદ્વક્તુમર્હસિ ।
ત્વદૃતે માનવં નાન્યં પ્રષ્ટુમર્હામ સત્તમ ॥ ૨૪૦.૭૮॥

મોક્ષદોષો મહાનેષ પ્રાપ્ય સિદ્ધિં ગતાનૃષીન્ ।
યદિ તત્રૈવ વિજ્ઞાને વર્તન્તે યતયઃ પરે ॥ ૨૪૦.૭૯॥

પ્રવૃત્તિલક્ષણં ધર્મં પશ્યામ પરમં દ્વિજ ।
મગ્નસ્ય હિ પરે જ્ઞાને કિંતુ દુઃખાન્તરં ભવેત્ ॥ ૨૪૦.૮૦॥

વ્યાસ ઉવાચ

યથાનાયાયં મુનિશ્રેષ્ઠાઃ પ્રશ્નઃ પૃષ્ટશ્ચ સંકટઃ ।
બુધાનામપિ સંમોહઃ પ્રશ્નેઽસ્મિન્મુનિસત્તમાઃ ॥ ૨૪૦.૮૧॥

અત્રાપિ તત્ત્વં પરમં શ્રૃણુધ્વં વચનં મમ ।
બુદ્ધિશ્ચ પરમા યત્ર કપિલાનાં મહાત્મનામ્ ॥ ૨૪૦.૮૨॥

ઇન્દ્રિયાણ્યપિ બુધ્યન્તે સ્વદેહં દેહિનાં દ્વિજાઃ ।
કરણાન્યાત્મનસ્તાનિ સૂક્ષ્મં પશ્યન્તિ તૈસ્તુ સઃ ॥ ૨૪૦.૮૩॥

આત્મના વિપ્રહીણાનિ કાષ્ઠકુડ્યસમાનિ તુ ।
વિનશ્યન્તિ ન સંદેહો વેલા ઇવ મહાર્ણવે ॥ ૨૪૦.૮૪॥

ઇન્દ્રિયૈઃ સહ સુપ્તસ્ય દેહિનો દ્વિજસત્તમાઃ ।
સૂક્ષ્મશ્ચરતિ સર્વત્ર નભસીવ સમીરણઃ ॥ ૨૪૦.૮૫॥

સ પશ્યતિ યથાન્યાયં સ્મૃત્વા સ્પૃશતિ ચાનઘાઃ ।
બુધ્યમાનો યથાપૂર્વમખિલેનેહ ભો દ્વિજાઃ ॥ ૨૪૦.૮૬॥

ઇન્દ્રિયાણિ હ સર્વાણિ સ્વે સ્વે સ્થાને યથાવિધિ ।
અનીશત્વાત્પ્રલીયન્તે સર્પા વિષહતા ઇવ ॥ ૨૪૦.૮૭॥

ઇન્દ્રિયાણિ હ સર્વાણિ સ્વસ્થાનેષ્વેવ સર્વશઃ ।
આક્રમ્ય ગતયઃ સૂક્ષ્માવ(શ્ચ)રત્યાત્મા ન સંશયઃ ॥ ૨૪૦.૮૮॥

સત્ત્વસ્ય ચ ગુણાન્કૃત્સ્નાન્રજસશ્ચ ગુણાન્પુનઃ ।
ગુણાંશ્ચ તમસઃ સર્વાન્ગુણાન્બુદ્ધેશ્ચ સત્તમાઃ ॥ ૨૪૦.૮૯॥

ગુણાંશ્ચ મનસશ્ચાપિ નભસશ્ચ ગુણાંસ્તથા ।
ગુણાન્વાયોશ્ચ સર્વજ્ઞાઃ સ્નેહજાંશ્ચ ગુણાન્પુનઃ ॥ ૨૪૦.૯૦॥

અપાં ગુણાસ્તથા વિપ્રાઃ પાર્થિવાંશ્ચ ગુણાનપિ ।
સર્વાનેવ ગુણૈર્વ્યાપ્ય ક્ષેત્રજ્ઞેષુ દ્વિજોત્તમાઃ ॥ ૨૪૦.૯૧॥

આત્મા ચરતિ ક્ષેત્રજ્ઞઃ કર્મણા ચ શુભાશુભે ।
શિષ્યા ઇવમહાત્માનમિન્દ્રિયાણિ ચ તં દ્વિજાઃ ॥ ૨૪૦.૯૨॥

પ્રકૃતિં ચાપ્યતિક્રમ્ય સુદ્ધં સૂક્ષ્મં પરાત્પરમ્ ।
નારાયણં મહાત્માનં નિર્વિકારં પરાત્પરમ્ ॥ ૨૪૦.૯૩॥

વિમુક્તં સર્વપાપેક્ષ્યઃ પ્રવિષ્ટં ચ હ્યનામયમ્ ।

પરમાત્માનમગુણં નિર્વૃતં તં ચ સત્તમાઃ ॥ ૨૪૦.૯૪॥

શ્રેષ્ઠં તત્ર મનો વિપ્રા ઇન્દ્રિયાણિ ચ ભોઃ દ્વિજાઃ ।
આગચ્છન્તિ યથાકાલં ગુરોઃ સંદેશકારિણઃ ॥ ૨૪૦.૯૫॥

શક્યં વાઽલ્પેન કાલેન શાન્તિં પ્રાપ્તું ગુણાંસ્તથા ।
એવમુક્તેન વિપ્રેન્દ્રાઃ સાંખ્ય યોગેન મોક્ષિણીમ્ ॥ ૨૪૦.૯૬॥

સાંખ્યા વિપ્રા મહાપ્રાજ્ઞા ગચ્છન્તિ પરમાં ગતિમ્ ।
જ્ઞાનેનાનેન વિપ્રેન્દ્રાસ્તુલ્યં જ્ઞાનં ન વિદ્યતે ॥ ૨૪૦.૯૭॥

અત્ર વઃ સંશયો મા ભૂજ્જ્ઞાનં સાંખ્યં પરં મતમ્ ।
અક્ષરં ધ્રુવમેવોક્તં પૂર્વં બ્રહ્મ સનાતનમ્ ॥ ૨૪૦.૯૮॥

અનાદિમધ્યનિધનં નિર્દ્વંદ્વં કર્તૃ શાશ્વતમ્ ।
કૂટસ્થં ચૈવ નિત્યં ચ યદ્વદન્તિ શમાત્મકાઃ ॥ ૨૪૦.૯૯॥

યતઃ સર્વાઃ પ્રવર્તન્તે સર્ગપ્રલયવિક્રિયાઃ ।
એવં શંસન્તિ શાસ્ત્રેષુ પ્રવક્તારો મહર્ષયઃ ॥ ૨૪૦.૧૦૦॥

સર્વે વિપ્રાશ્ચ વેદાશ્ચ તથા સામવિદો જનાઃ ।
બ્રહ્મણ્યં પરમં દેવમનન્તં પરમાચ્યુતમ્ ॥ ૨૪૦.૧૦૧॥

પ્રર્થયન્તશ્ચ તં વિપ્રા વદન્તિ ગુણબુદ્ધયઃ ।
સમ્યગુક્તાસ્તથા યોગાઃ સાંખ્યાશ્ચામિતદર્શનાઃ ॥ ૨૪૦.૧૦૨॥

અમૂર્તિસ્તસ્ય વિપ્રેન્દ્રાઃ સાંખ્યં મૂર્તિરિતિ શ્રુતિઃ ।
અભિજ્ઞાનાનિ તસ્યાઽઽહુર્મહાન્તિ મુનિસત્તમાઃ ॥ ૨૪૦.૧૦૩॥

દ્વિવિધાનિ હિ ભૂતાનિ પૃથિવ્યાં દ્વિજસત્તમાઃ ।
અગમ્યગમ્યસંજ્ઞાનિ ગમ્યં તત્ર વિશિષ્યતે ॥ ૨૪૦.૧૦૪॥

જ્ઞાનં મહદ્વૈ મહતશ્ચ વિપ્રા, વેદેષુ સાંખ્યેષુ તથૈવ યોગે ।
યચ્ચાપિ દૃષ્ટં વિધિવત્પુરાણે, સાંખ્યાગતં તન્નિખિલં મુનીન્દ્રાઃ ॥ ૨૪૦.૧૦૫॥

યચ્ચેતિહાસેષુ મહત્સુ દૃષ્ટં, યથાર્થશાસ્ત્રેષુ વિશિષ્ટદૃષ્ટમ્ ।
જ્ઞાનં ચ લોકે યદિહાસ્તિ કિંચિત્સાંખ્યાગતં તચ્ચ મહામુનીન્દ્રાઃ ॥ ૨૪૦.૧૦૬॥

સમસ્તદૃષ્ટં પરમં બલં ચ, જ્ઞાનં ચ મોક્ષશ્ચ યથાવદુક્તમ્ ।
તપાંસિ સૂક્ષ્માણિ ચ યાનિ ચૈવ, સાંખ્યં યથાવદ્વિહિતાનિ વિપ્રાઃ ॥ ૨૪૦.૧૦૭॥

વિપર્યયં તસ્ય હિતં સદૈવ, ગચ્છન્તિ સાંખ્યાઃ સતતં સુખેન ।
તાંશ્ચાપિ સંધાર્ય તતઃ કૃતાર્થાઃ, પતન્તિ વિપ્રાયતનેષુ ભૂયઃ ॥ ૨૪૦.૧૦૮॥

હિત્વા ચ દેહં પ્રવિશન્તિ મોક્ષં દિવૌકસશ્ચાપિ ચ યોગસાંખ્યાઃ ।
અતોઽધિકં તેઽભિરતા મહાર્હે, સાખ્યે દ્વિજા ભો ઇહ શિષ્ટજુષ્ટે ॥ ૨૪૦.૧૦૯॥

તેષાં તુ તિર્યગ્ગમનં હિ દૃષ્ટં, નાધો ગતિઃ પાપકૃતાં નિવાસઃ ।
ન વા પ્રધાના અપિ તે દ્વિજાતયો, યે જ્ઞાનમેતન્મુનયો ન સક્તાઃ ॥ ૨૪૦.૧૧૦॥

સાંખ્યાં વિશાલં પરમં પુરાણં, મહાર્ણવં વિમલમુદારકાન્તમ્ ।
કૃત્સ્નં હિ સાંખ્યા મુનયા મહાત્મનારાયણે ધારયથાપ્રમેયમ્ ॥ ૨૪૦.૧૧૧॥

એતન્મયોક્તં પરમં હિ તત્ત્વં, નારાયણાદ્વિશ્વમિદં પુરાણમ્ ।
સ સર્ગકાલે ચ કરોતિ સર્ગં, સંહારકાલે ચ હરેત ભૂયઃ ॥ ૨૪૦.૧૧૨॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વ્યાસઋષિસંવાદે સાંખ્યવિધિનિરૂપણં
નામૈકોનચત્વારિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૪૦॥

---

અધ્યાયઃ ૨૪૧ (૧૩૩)

વસિષ્ઠકરાલજનકસંવાદે ક્ષરાક્ષરવિચારનિરૂપણમ્

મુનય ઊચુઃ

કિં તદક્ષરમિત્યુક્તં યસ્માન્નાઽઽવર્તતે પુનઃ ।
કિંસ્વિત્તત્ક્ષરમિત્યુક્તં યસ્માદાવર્તતે પુનઃ ॥ ૨૪૧.૧॥

અક્ષરાક્ષરયોર્વ્યક્તિં પૃચ્છામસ્ત્વાં મહામુને ।
ઉપલબ્ધું મુનિશ્રેષ્ઠ તત્ત્વેન મુનિપુંગવ ॥ ૨૪૧.૨॥

ત્વં હિ જ્ઞાનવિદાં શ્રેષ્ઠઃ પ્રોચ્યસે વેદપારગૈઃ ।
ઋષિભિશ્ચ મહાભાગૈર્યતિભિશ્ચ મહાત્મભિઃ ॥ ૨૪૧.૩॥

તદેતચ્છ્રોતુમિચ્છામસ્ત્વત્તઃ સર્વં મહામતે ।
ન તૃપ્તિમધિગચ્છામઃ શ્રૃણ્વન્તોઽમૃતમુત્તમમ્ ॥ ૨૪૧.૪॥

વ્યાસ ઉવાચ

અત્ર વો વર્ણયિષ્યામિ ઇતિહાસં પુરાતનમ્ ।
વસિષ્ઠસ્ય ચ સંવાદં કરાલજનકસ્ય ચ ॥ ૨૪૧.૫॥

વસિષ્ઠં શ્રેષ્ઠમાસીનમૃષીણાં ભાસ્કરદ્યુતિમ્ ।
પપ્રચ્છ જનકો રાજા જ્ઞાનં નૈઃશ્રેયસં પરમ્ ॥ ૨૪૧.૬॥

પરમાત્મનિ કુશલમધ્યાત્મગતિનિશ્ચયમ્ ।
મૈત્રાવરુણિમાસીનમભિવાદ્ય કૃતાઞ્જલિઃ ॥ ૨૪૧.૭॥

સ્વચ્છન્દં સુકૃતં ચૈવ મધુરં ચાપ્યનુલ્બણમ્ ।
પપ્રચ્છર્ષિવરં રાજા કરાલજનકઃ પુરા ॥ ૨૪૧.૮॥

કરાલજનક ઉવાચ
ભગવઞ્શ્રોતુમિચ્છામિ પરં બ્રહ્મ સનાતનમ્ ।
યસ્મિન્ન પુનરાવૃત્તિં પ્રાપ્નુવન્તિ મનીષિણઃ ॥ ૨૪૧.૯॥

યચ્ચ તત્ક્ષરમિત્યુક્તં યત્રેદં ક્ષરતે જગત્ ।
યચ્ચાક્ષરમિતિ પ્રોક્તં શિવં ક્ષેમમનામયમ્ ॥ ૨૪૧.૧૦॥

વસિષ્ઠ ઉવાચ
શ્રૂયતાં પૃથિવીપાલ ક્ષરતીદં યથા જગત્ ।
યત્ર ક્ષરતિ પૂર્વેણ યાવત્કાલેન ચાપ્યથ ॥ ૨૪૧.૧૧॥

યુગં દ્વાદશસાહસ્રં કલ્પં વિદ્ધિ ચતુર્યુગમ્ ।
દશકલ્પશતાવર્તમહસ્તદ્બ્રાહ્મમુચ્યતે ॥ ૨૪૧.૧૨॥

રાત્રિશ્ચૈતાવતી રાજન્યસ્યન્તે પ્રતિબુધ્યતે ।
સૃજત્યનન્તકર્માણિ મહાન્તં ભૂતમગ્રજમ્ ॥ ૨૪૧.૧૩॥

મૂર્તિમન્તમમૂર્તાત્મા વિશ્વં શંભુઃ સ્વયંભુવઃ ।
યત્રોત્પત્તિં પ્રવક્ષ્યામિ મૂલતો નૃપસત્તમ ॥ ૨૪૧.૧૪॥

અણિમા લઘિમા પ્રાપ્તિરીશાનં જ્યોતિરવ્યયમ્ ।
સર્વતઃપાણિપાદાન્તં સર્વતોઽક્ષિશિરોમુખમ્ ॥ ૨૪૧.૧૫॥

સર્વતઃશ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ।
હિરણ્યગર્ભો ભગવાનેષ બુદ્ધિરિતિ સ્મૃતિઃ ॥ ૨૪૧.૧૬॥

મહાનિતિ ચ યોગેષુ વિરિઞ્ચિરિતિ ચાપ્યથ ।
સાંખ્યે ચ પઠ્યતે શાસ્ત્રે નામભિર્બહુધાત્મકઃ ॥ ૨૪૧.૧૭॥

વિચિત્રરૂપો વિશ્વાત્મા એકાક્ષર ઇતિ શ્રુતઃ ।
ધૃતમેકાત્મકં યેન કૃત્સ્નં ત્રૈલોક્યમાત્મના ॥ ૨૪૧.૧૮॥

તથૈવ બહુરૂપત્વાદ્વિશ્વરૂપ ઇતિ શ્રુતઃ ।
એષ વૈ વિક્રિયાપન્નઃ સૃજત્યાત્માનમાત્મના ॥ ૨૪૧.૧૯॥

પ્રધાનં તસ્ય સંયોગાદુત્પન્નં સુમહત્પુરમ્ ।
અહંકારં મહાતેજાઃ પ્રજાપતિનમસ્કૃતમ્ ॥ ૨૪૧.૨૦॥

અવ્યક્તાદ્વ્યક્તિમાપન્નં વિદ્યાસર્ગં વદન્તિ તમ્ ।
મહાન્તં ચાપ્યહંકારમવિદ્યાસર્ગ એવ ચ ॥ ૨૪૧.૨૧॥

અચરશ્ચ ચરશ્ચૈવ સમુત્પન્નૌ તથૈકતઃ ।
વિદ્યાઽવિદ્યેતિ વિખ્યાતે શ્રુતિશાસ્ત્રાનુચિન્તકૈઃ ॥ ૨૪૧.૨૨॥

ભૂતસર્ગમહંકારત્તૃતીયં વિદ્ધિ પાર્થિવ ।
અહંકારેષુ નૃપતે ચતુર્થં વિદ્ધિ વૈકૃતમ્ ॥ ૨૪૧.૨૩॥

વાયુર્જ્યોતિરથાઽઽકાશમાપોઽથ પૃથિવી તથા ।
શબ્દસ્પર્શૌ ચ રૂપં ચ રસો ગન્ધસ્તથૈવ ચ ॥ ૨૪૧.૨૪॥

એવં યુગપદુત્પન્નં દશવર્ગમસંશયમ્ ।
પઞ્ચમં વિદ્ધિ રાજેન્દ્ર ભૌતિકં સર્ગમર્થકૃત્ ॥ ૨૪૧.૨૫॥

શ્રોત્રં ત્વક્ચક્ષુષી જિહ્વા ઘ્રાણમેવ ચ પઞ્ચમમ્ ।
વાગ્ઘસ્તૌ ચૈવ પાદૌ ચ પાયુર્મેઢ્રં તથૈવ ચ ॥ ૨૪૧.૨૬॥

બુદ્ધીન્દ્રિયાણિ ચૈતાનિ તથા કર્મેન્દ્રિયાણિ ચ ।
સંભૂતાનીહ યુગપન્મનસા સહ પાર્થિવ ॥ ૨૪૧.૨૭॥

એષા તત્ત્વચતુર્વિંશા સર્વાઽઽકૃતિઃ પ્રવર્તતે ।
યાં જ્ઞાત્વા નાભિશોચન્તિ બ્રાહ્મણાસ્તત્ત્વદર્શિનઃ ॥ ૨૪૧.૨૮॥

એવમેતત્સમુત્પન્નં ત્રૈલોક્યમિદમુત્તમમ્ ।
વેદિતવ્યં નરશ્રેષ્ઠ સદૈવ નરકાર્ણવે ॥ ૨૪૧.૨૯॥

સયક્ષભૂતગન્ધર્વે સકિંનરમહોરગે ।
સચારણપિશાચે વૈ સદેવર્ષિનિશાચરે ॥ ૨૪૧.૩૦॥

સદંશકીટમશકે સપૂતિકૃમિમૂષકે ।

શુનિ શ્વપાકે ચૈણેયે સચાણ્ડાલે સપુલ્કસે ॥ ૨૪૧.૩૧॥

હસ્ત્યશ્વખરશાર્દૂલે સવૃકે ગવિ ચૈવ હ ।
યા ચ મૂર્તિશ્ચ યત્કિંચિત્સર્વત્રૈતન્નિદર્શનમ્ ॥ ૨૪૧.૩૨॥

જલે ભુવિ તથાઽઽકાશે નાન્યત્રેતિ વિનિશ્ચયઃ ।
સ્થાનં દેહવતામાસીદિત્યેવનુશુશ્રુમ ॥ ૨૪૧.૩૩॥

કૃત્સ્નમેતાવતસ્તાત ક્ષરતે વ્યક્તસંજ્ઞકઃ ।
અહન્યહનિ ભૂતાત્મા યચ્ચાક્ષર ઇતિ સ્મૃતમ્ ॥ ૨૪૧.૩૪॥

તતસ્તત્ક્ષરમિત્યુક્તં ક્ષરતીદં યથા જગત્ ।
જગન્મોહાત્મકં ચાઽઽહુરવ્યક્તાદ્વ્યક્તસંજ્ઞકમ્ ॥ ૨૪૧.૩૫॥

મહાંશ્ચૈવાક્ષરો નિત્યમેતત્ક્ષરવિવર્જનમ્ ।
કથિતં તે મહારાજ યસ્માન્નાઽઽવર્તતે પુનઃ ॥ ૨૪૧.૩૬॥

પઞ્ચવિંશતિકોઽમૂર્તઃ સ નિત્યસ્તત્ત્વસંજ્ઞકઃ ।
સત્ત્વસંશ્રયણાત્તત્વં સત્ત્વમાહુર્મનીષિણઃ ॥ ૨૪૧.૩૭॥

યદમૂર્તિઃ સૃજદ્વ્યક્તં તન્મૂર્તિમધિતિષ્ઠતિ ।
ચતુર્વિંશતિમો વ્યક્તો હ્યમૂર્તિઃ પઞ્ચવિંશકઃ ॥ ૨૪૧.૩૮॥

સ એવ હૃદિ સર્વાસુ મૂર્તિષ્વાતિષ્ઠતાઽઽત્મવાન્ ।
ચેતયંશ્ચેતનીં નિત્યં સર્વમૂર્તિરમૂર્તિમાન્ ॥ ૨૪૧.૩૯॥

સર્ગપ્રલયધર્મેણ સ સર્ગપ્રલયાત્મકઃ ।
ગોચરે વર્તતે નિત્યં નિર્ગુણો ગુણસંજ્ઞિતઃ ॥ ૨૪૧.૪૦॥

એવમેષ મહાત્મા ચ સર્ગપ્રલયકોટિશઃ ।
વિકુર્વાણઃ પ્રકૃતિમાન્નાભિમન્યેત બુદ્ધિમાન્ ॥ ૨૪૧.૪૧॥

તમઃસત્ત્વરજોયુક્તસ્તાસુ તાસ્વિહ યોનિષુ ।
લીયતે પ્રતિબુદ્ધત્વાદબુદ્ધજનસેવનાત્ ॥ ૨૪૧.૪૨॥

સહવાસનિવાસત્વાદ્બાલોઽહમિતિ મન્યતે ।
યોઽહં ન સોઽહમિત્યુક્તે ગુણાનેવાનુવર્તતે ॥ ૨૪૧.૪૩॥

તમસા તામસાન્ભાવન્વિવિધાન્પ્રતિપદ્યતે ।
રજસા રાજસાંશ્ચૈવ સાત્ત્વિકાન્સત્ત્વસંક્ષયાત્ ॥ ૨૪૧.૪૪॥

શુક્લલોહિતકૃષ્ણાનિ રૂપાણ્યેતાનિ ત્રીણિ તુ ।
સર્વાણ્યેતાનિ રૂપાણિ જાનીહિ પ્રાકૃતાનિ તુ ॥ ૨૪૧.૪૫ ।
તામસા નિરયં યાન્તિ રાજસા માનુષાનથ ।
સાત્ત્વિકા દેવલોકાય ગચ્છન્તિ સુખભાગિનઃ ॥ ૨૪૧.૪૬॥

નિષ્કેવલેન પાપેન તિર્યગ્યોનિમવાપ્નુયાત્ ।
પુણ્યપાપેષુ માનુષ્યં પુણ્યમાત્રેણ દેવતાઃ ॥ ૨૪૧.૪૭॥

એવમવ્યક્તવિષયં મોક્ષમાહુર્મનીષિણઃ ।
પઞ્ચવિંશતિમો યોઽયં જ્ઞાનાદેવ પ્રવર્તતે ॥ ૨૪૧.૪૮॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વસિષ્ઠકરાલજનકસંવાદે
ક્ષરાક્ષરવિચારનિરૂપણં નામ એકચત્વારિંશદધિકદ્વિશતતમોઽધ્યાયઃ॥

૨૪૧ ॥

---

અધ્યાયઃ ૨૪૨ (૧૩૪)
વશિષ્ઠકરાલજનકસંવાદવર્ણનમ્
વસિષ્ઠ ઉવાચ
એવમપ્રતિબુદ્ધત્વાદબુદ્ધમનુવર્તતે ।
દેહાદ્દેહસહસ્રાણિ તથા ચ ન સ ભિદ્યતે ॥ ૨૪૨.૧॥

તિર્યગ્યોનિસહસ્રેષુ કદાચિદ્દેવતાસ્વપિ ।
ઉત્પદ્યતિ તપોયોગાદ્ગુણૈઃ સહ ગુણક્ષયાત્ ॥ ૨૪૨.૨॥

મનુષ્યત્વાદ્દિવં યાતિ દેવો માનુષ્યમેતિ ચ ।
માનુષ્યાન્નિરયસ્થાનમાલયં પ્રતિપદ્યતે ॥ ૨૪૨.૩॥

કોષકારો યથાઽઽત્માનં કીટઃ સમભિરુન્ધતિ ।
સૂત્રતન્તુગુણૈર્નિત્યં તથાઽયમગુણો ગુણૈઃ ॥ ૨૪૨.૪॥

દ્વંદ્વંમેતિ ચ નિર્દ્વંદ્વસ્તાસુ તાસ્વિહ યોનિષુ ।
શીર્ષરોગેઽક્ષિરોગે ચ દન્તશૂલે ગલગ્રહે ॥ ૨૪૨.૫॥

જલોદરેઽતિસારે ચ ગણ્ડમાલવિચર્ચિકે ।
શ્વત્રકુષ્ઠેઽગ્નિદગ્ધે ચ સિધ્માપસ્મારયોરપિ ॥ ૨૪૨.૬॥

યાનિ ચાન્યાનિ દ્વંદ્વાનિ પ્રાકૃતાનિ શરીરિણામ્ ।
ઉત્પદ્યન્તે વિચિત્રાણિ તાન્યેવાऽऽત્માऽભિમન્યતે ॥ ૨૪૨.૭॥

અભિમાનાતિમાનાનાં તથૈવ સુકૃતાન્યપિ ।
એકવાસાશ્ચતુર્વાસાઃ શાયી નિત્યમધસ્તથા ॥ ૨૪૨.૮॥

મણ્ડૂકશાયી ચ તથા વીરાસનગતસ્તથા ।
વીરમાસનમાકાશે તથા શયનમેવ ચ ॥ ૨૪૨.૯॥

ઇષ્ટકાપ્રસ્તરે ચૈવ ચક્રકપ્રસ્તરે તથા ।
ભસ્માપ્રસ્તરશાયી ચ ભૂમિશય્યાનુલેપનઃ ॥ ૨૪૨.૧૦॥

વીરસ્થાનામ્બુપાકે ચ શયનં ફલકેષુ ચ ।
વિવિધાસુ ચ શય્યાસુ ફલગૃહ્યાન્વિતાસુ ચ ॥ ૨૪૨.૧૧॥

ઉદ્યાને ખલલાગ્રે તુ ક્ષૌમકૃષ્ણાજિનાન્વિતઃ ।
મણિવાલપરીધાનો વ્યાઘ્રચર્મપરિચ્છદઃ ॥ ૨૪૨.૧૨॥

સિંહચર્મપરીધાનઃ પટ્ટવાસાસ્તથૈવ ચ ।
ફલકં(?)પરિધાનશ્ચ તથા કટકવસ્ત્રધૃક્ ॥ ૨૪૨.૧૩॥

કટૈકવસનશ્ચૈવ ચીરવાસાસ્તથૈવ ચ ।
વસ્ત્રાણિ ચાન્યાનિ બહૂન્યભિમત્ય ચ બુદ્ધિમાન્ ॥ ૨૪૨.૧૪॥

ભોજનાનિ વિચિત્રાણિ રત્નાનિ વિવિધાનિ ચ ।
એકરાત્રાન્તરાશિત્વમેકકાલિભોજનમ્ ॥ ૨૪૨.૧૫॥

ચતુર્થાષ્ટમકાલં ચ ષષ્ઠકાલિકમેવ ચ ।
ષડ્રાત્રભોજનશ્ચૈવ તથા ચાષ્ટાહભોજનઃ ॥ ૨૪૨.૧૬॥

માસોપવાસી મૂલાશી ફલાહારસ્તથૈવ ચ ।
વાયુભક્ષશ્ચ પિણ્યાકદધિગોમયભોજનઃ ॥ ૨૪૨.૧૭॥

ગોમૂત્રભોજનશ્ચૈવ કાશપુષ્પાશનસ્તથા ।
શૈવાલભોજનશ્ચૈવ તથા ચાન્યેન વર્તયન્ ॥ ૨૪૨.૧૮॥

વર્તયઞ્શીર્ણપર્ણૈશ્ચ પ્રકીર્ણફલભોજનઃ ।
વિવિધાનિ ચ કૃચ્છ્રાણિ સેવતે સિદ્ધિકાઙ્ક્ષયા ॥ ૨૪૨.૧૯॥

ચાન્દ્રાયણાનિ વિધિવલ્લિઙ્ગાનિ વિવિધાનિ ચ ।
ચાતુરાશ્રમ્યયુક્તાનિ ધર્માધર્માશ્રયાણ્યપિ ॥ ૨૪૨.૨૦॥

ઉપાશ્રયાનપ્યપરાન્પાખણ્ડાન્વિવિધાનપિ ।
વિવિક્તાશ્ચ શિલાછાયાસ્તથા પ્રસ્રવણાનિ ચ ॥ ૨૪૨.૨૧॥

પુલિનાનિ વિવિક્તાનિ વિવિધાનિ તપાંસિ ચ ।
યજ્ઞાંશ્ચ વિવિધાકારાન્વિધીશ્ચ વિવિધાસ્તથા ॥ ૨૪૨.૨૨॥

નિયમાન્વિવિધાંશ્ચાપિ વિવિધાનિ તપાંસિ ચ ।
યજ્ઞાંશ્ચ વિવિધાકારાન્વિધીશ્ચ વિવિધાસ્તથા ॥ ૨૪૨.૨૩॥

વણિક્પથં દ્વિજક્ષત્રવૈશ્યશૂદ્રાંસ્તથૈવ ચ ।
દાનાં ચ વિવિધાકારં દીનાન્ધકૃપણાદિષુ ॥ ૨૪૨.૨૪॥

અભિમન્યેત સંધાતું તથૈવ વિવિધાન્ગુણાન્ ।
સત્ત્વં રજસ્તમશ્ચૈવ ધર્માર્થૌ કામ એવ ચ ॥ ૨૪૨.૨૫॥

યજનાધ્યયને દાનં તથૈવાऽऽહુઃ પ્રતિગ્રહમ્ ।
યાજનાધ્યાપને ચૈવ તથાऽન્યદપિ કિંચન ॥ ૨૪૨.૨૬॥

યજનાધ્યયને દાનં તથૈવાऽऽહુઃ પ્રતિગ્રહમ્ ।
યાજનાધ્યાપને ચૈવ તથાऽન્યદપિ કિંચન ॥ ૨૪૨.૨૭॥

જન્મમૃત્યુવિધાનેન તથા વિશસનેન ચ ।
શુભાશુભમયં સર્વમેતદાહુઃ સનાતનમ્ ॥ ૨૪૨.૨૮॥

પ્રકૃતિઃ કુરુતે દેવી ભયં પ્રલયમેવ ચ ।
દિવસાન્તે ગુણાનેતાનતીત્યૈકોऽવતિષ્ઠતે ॥ ૨૪૨.૨૯॥

રશ્મિજાલમિવાऽऽદિત્યસ્તત્કાલં સંનિયચ્છતિ ।
એવમેવૈષ તત્સર્વં ક્રીડાર્થમભિમન્યતે ॥ ૨૪૨.૩૦॥

આત્મરૂપગુણાનેતાન્વિવિધાન્હૃદયપ્રિયાન્ ।
એવમેતાં પ્રકુર્વાણઃ સર્ગપ્રલયધર્મિણીમ્ ॥ ૨૪૨.૩૧॥

ક્રિયાં ક્રિયાપથે રક્તસ્ત્રિગુણસ્ત્રિગુણાધિપઃ ।
ક્રિયાક્રિયાપતોપેતસ્તથા તદિતિ મન્યતે ॥ ૨૪૨.૩૨॥

પ્રકૃત્યા સર્વમેવેદં જગદન્ધીકૃતં વિભો ।

રજસા તમસા ચૈવ વ્યાપ્તં સર્વમનેકધા ॥ ૨૪૨.૩૩॥

એવં દ્વંદ્વાન્યતીતાનિ મમ વર્તન્તિ નિત્યશઃ ।
મત્ત એતાનિ જાયન્તે પ્રલયે યાન્તિ મામપિ ॥ ૨૪૨.૩૪॥

નિસ્તર્તવ્યાણ્યૈતાનિ સર્વાણીતિ નરાધિપ ।
મન્યતે પક્ષબુધ્દ્ધત્વાત્તથૈવ સુકૃતાન્યપિ ॥ ૨૪૨.૩૫॥

ભોક્તવ્યાનિ મમૈતાનિ વેવલોકગતેન વૈ ।
ઇહૈવ ચૈનં ભોક્ષ્યામિ શુભાસુભફલોદયમ્ ॥ ૨૪૨.૩૬॥

સુખમેવં તુ કર્તવ્યં સકૃત્કૃત્વા સુખં મમ॥

યાવદેવ તુ મે સૌખ્યં જાત્યાં જાત્યાં ભવિષ્યતિ ॥ ૨૪૨.૩૭॥

ભવિષ્યતિ ન મે દુઃખં કૃતેનેહાપ્યનન્તકમ્ ।
સુખદુઃખં હિ માનુષ્યં નિરયે ચાપિ મજ્જનમ્ ॥ ૨૪૨.૩૮॥

નિરયાચ્ચાપિ માનુષ્યં કાલેનૈષ્યામ્યહં પુનઃ ।
મનુષ્યત્વાચ્ચ દેવત્વં દેવત્વાત્પૌરુષં પુનઃ ॥ ૨૪૨.૩૯॥

મનુષ્યત્વાચ્ચ નિરયં પર્યાયેણોપગચ્છતિ ।
એષ એવં દ્વિજાતીનામાત્મા વૈ સ ગુણૈર્વૃતઃ ॥ ૨૪૨.૪૦॥

તેન દેવમનુષ્યેષુ નિરયં ચોપપદ્યતે ।
મમત્વેનાઽઽવૃતો નિત્યં તત્રૈવ પરિવર્તતે ॥ ૨૪૨.૪૧॥

સર્ગકોટિસહસ્રાણિ મરણાન્તાસુ મૂર્તિષુ ।
ય એવં કુરુતે કર્મ શૂભાશુભફલાત્મકમ્ ॥ ૨૪૨.૪૨॥

સ એવ ફલમાપ્નોતિ ત્રિષુ લોકેષુ મૂર્તિમાન્ ।
પ્રકૃતિઃ કુરુતે કર્મશુભશુભફલાત્મકમ્ ॥ ૨૪૨.૪૩॥

પ્રકૃતિશ્ચ તથાઽઽનોતિ ત્રિષુ લોકેષુ કામણા ।
તિર્યગ્યોનિમનુષ્યત્વલે દેવલોકે તથૈવ ચ ॥ ૨૪૨.૪૪॥

ત્રીણિ સ્થાનાનિ ચૈતાનિ જાનીયાત્પ્રાકૃતાનિ હ ।
અલિઙ્ગપ્રકૃતિત્વાચ્ચ લિઙ્ગૈરપ્યનુમીયતે ॥ ૨૪૨.૪૫॥

તથૈવ પૌરુષં લિઙ્ગમનુમાનાદ્ધિ મન્યતે ।

સ લિઙ્ગાન્તરમાસાદ્ય પ્રાકૃતં લિઙ્ગમવ્રણમ્ ॥ ૨૪૨.૪૬॥

વ્રણદ્વારાણ્યધિષ્ઠાય કર્માણ્યાત્મનિ મન્યતે ।
શ્રોત્રાદીનિ તુ સર્વાણિ પઞ્ચ કર્મેન્દ્રિયાણ્યથ ॥ ૨૪૨.૪૭॥

રાગાદીનિ પ્રવર્તન્તે ગુણેષ્વિહ ગુણૈઃ સહ ।
અહમેતાનિ વૈ કુર્વન્મમૈતાનીન્દ્રિયાણિહ ॥ ૨૪૨.૪૮॥

નિરિન્દ્રિયો હિ મન્યેત વ્રણવાનસ્મિ નિર્વ્રણઃ ।
અલિઙ્ગો લિઙ્ગમાત્માનમકાલં કાલમાત્મનઃ ॥ ૨૪૨.૪૯॥

અસત્ત્વં સત્ત્વમાત્માનમમૃતં મૃતમાત્મનઃ ।
અમૃત્યું મૃત્યુમાત્માત્માનમભવં ભવમાત્મનઃ ॥ ૨૪૨.૫૦॥

અક્ષેત્રં ક્ષેત્રમાત્માનમસઙ્ગં સઙ્ગમાત્મનઃ ।
અતત્ત્વં તત્ત્વમાત્માનમભવં ભવમાત્મનઃ ॥ ૨૪૨.૫૧॥

અક્ષરં ક્ષરમાત્માનમબુદ્ધ્વત્વાદ્ધિ મન્યતે ।
એવમપ્રતિબુદ્ધ્વત્વાદબુદ્ધજનસેવનાત્ ॥ ૨૪૨.૫૨॥

સર્ગકોટિસહસ્રાણિ પતનાન્તાનિ ગચ્છતિ ।
જન્માન્તરસહસ્રાણિ મરણાન્તાનિ ગચ્છતિ ॥ ૨૪૨.૫૩॥

તિર્યગ્યોનિમનુષ્યત્વે દેવલોકે તથૈવ ચ ।
ચન્દ્રમા ઇવ કોશાનાં પુનસ્તત્ર સહસ્રશઃ ॥ ૨૪૨.૫૪॥

નીયતેઽપ્રતિબુદ્ધ્વત્વાદેવમેવ કુબુદ્ધિમાન્ ।
કલા પઞ્ચદશી યોનિસ્તદ્ધામ ઇતિ પઠ્યતે ॥ ૨૪૨.૫૫॥

નિત્યમેવ વિજાનીહિ સોમં વૈ ષોડશાંશકૈઃ ।
કલયા જાયતેઽજસ્રં પુનઃ પુનરબુદ્ધિમાન્ ॥ ૨૪૨.૫૬॥

ધીમાંશ્ચાયં ન ભવતિ નૃપ એવં હિ જાયતે ।
ષોડશી તુ કલા સૂક્ષ્મા સ સોમ ઉપધાર્યતામ્ ॥ ૨૪૨.૫૭॥

ન તૂપયૂજ્યતે દેવૈર્દેવાનપિ યુનક્તિ સઃ ।
મમત્વં ક્ષપયિત્વા તુ જાયતે નૃપસત્તમ॥

પ્રકૃતેસ્ત્રિગુણાયાસ્તુ સ એવ ત્રિગુણો ભવેત્ ॥ ૨૪૨.૫૮॥

---

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વસિષ્ઠકરાલજનકસંવાદે
દ્વિચત્વારિંશદધિકદ્વિશતતમોऽધ્યાયઃ ॥ ૨૪૨॥

રહ્મપુરાણમ્

---

અધ્યાયઃ ૨૪૩ (૧૩૫)

વશિષ્ઠં પ્રતિ મોક્ષધર્મવિષયકો જનકપ્રશ્નઃ

જનક ઉવાચ

અક્ષરક્ષરયોરેષ દ્વયોઃ સંબન્ધ ઇષ્યતે ।
સ્ત્રીપુંસયોર્વા સમ્બન્ધ સ વૈ પુરુષ ઉચ્યતે ॥ ૨૪૩.૧॥

ઋતે તુ પુરુષં નેહ સ્ત્રી ગર્ભાન્ધારયત્યુત ।
ઋતે સ્ત્રિયં ન પુરુષો રૂપં નિર્વર્તતે તથા ॥ ૨૪૩.૨॥

અન્યોન્યસ્યાભિસંબન્ધાનયોન્યગુણસંશ્રયાત્ ।
રૂપં નિર્વર્તયેદેતદેવં સર્વાસુ યોનિષુ ॥ ૨૪૩.૩॥

રત્યર્થમતિસંયોગાદન્યોન્યગુમસંશ્રયાત્ ।
ઋતૌ નિર્વર્તતે રૂપં તદ્વક્ષ્યામિ નિદર્શનમ્ ॥ ૨૪૩.૪॥

યે ગુણાઃ પરુષસ્યેહ યે ચ માતુર્ગુણાસ્તથા ।
અસ્થિ સ્નાયુ ચ મજ્જા ચ જાનીમઃ પિતૃતો દ્વિજ ॥ ૨૪૩.૫॥

ત્વઙ્માસશોણિતં ચેતિ માતૃજાન્યનુશુશ્રુમ ।
એવમેતદ્દ્વિજશ્રેષ્ઠ વેદશાસ્ત્રેષુ પઠ્યતે ॥ ૨૪૩.૬॥

પ્રમાણં યચ્ચ વેદોક્તં શાસ્ત્રોક્તં યચ્ચ પઠ્યતે ।
વેદશાસ્ત્રપ્રમાણં ચ પ્રમાણં તત્સનાતનમ્ ॥ ૨૪૩.૭॥

એવમેવાભિસમ્બન્ધૌ નિત્યં પ્રકૃતિપૂરુષૌ ।
યચ્ચાપિ ભગવંસ્તસ્માન્મોક્ષધર્મો ન વિદ્યતે ॥ ૨૪૩.૮॥

અથવાऽનન્તરકૃતં કિંચિદેવ નિદર્શનમ્ ।
તન્મમાऽऽચક્ષ્વ તત્ત્વેન પ્રત્યક્ષો હ્યસિ સર્વદા ॥ ૨૪૩.૯॥

મોક્ષકામા વયં ચાપિ કાઙ્ક્ષામો યદનામયમ્ ।
અજેયમજરં નિત્યમતીન્દ્રિયમનીશ્વરમ્ ॥ ૨૪૩.૧૦॥

વસિષ્ઠ ઉવાચ
યદેતદુક્તં ભવતા વેદશાસ્ત્રનિદર્શનમ્ ।
એવમેતદ્યથા વક્ષ્યે તત્ત્વગ્રાહી યથા ભવાન્ ॥ ૨૪૩.૧૧॥

ધાર્યતે હિ ત્વાયા ગ્રન્થ ઉભયોર્વેદશાસ્ત્રયોઃ ।
ન ચ ગ્રન્થસ્ય તત્ત્વજ્ઞો યથાતત્ત્વં નરેશ્વર ॥ ૨૪૩.૧૨॥

યો હિ વેદે ચ શાસ્ત્રે ચ ગ્રાન્થધારણતત્પરઃ ।
ન ચ ગ્રન્તાર્થતત્ત્વજ્ઞસ્તસ્ય તદ્ધારણં વૃથા ॥ ૨૪૩.૧૩॥

ભારં સ વહતે તસ્ય ગ્રન્થસ્યાર્થં ન વેત્તિ યઃ ।
યસ્તુ ગ્રન્થાર્થતત્ત્વજ્ઞો નાસ્ય ગ્રન્થાગમો વૃથા ॥ ૨૪૩.૧૪॥

ગ્રન્થસ્યાર્થં સ પૃષ્ટસ્તુ માદૃશો વક્તુમર્હતિ ।
યથાતત્ત્વાભિગમનાદર્થં તસ્ય સ વિન્દતિ ॥ ૨૪૩.૧૫॥

ન યઃ સમુત્સુકઃ કશ્ચિદ્ગ્રન્થાર્થં સ્થૂલબુદ્ધિમાન્ ।
સ કથં મન્દવિજ્ઞાનો ગ્રન્થં વક્ષ્યતિ નિર્ણયાત્ ॥ ૨૪૩.૧૬॥

અજ્ઞાત્વા ગ્રન્થતત્ત્વાનિ વાદં યઃ કુરુતે નરઃ ।
લોભાદ્વાઽપ્યથવા દમ્ભાત્સ પાપી નરકં વ્રજેત્ ॥ ૨૪૩.૧૭॥

નિર્ણયં ચાપિ ચ્છિદ્રાત્મા ન તદ્વક્ષ્યતિ તત્ત્વતઃ ।
સોઽપીહાસ્યાર્થતત્ત્વજ્ઞો યસ્માન્નૈવાઽઽત્મવાનપિ ॥ ૨૪૩.૧૮॥

તસ્માત્ત્વં શૃણુ રાજેન્દ્ર યથૈતદનુદૃશ્યતે ।
યથા તત્ત્વેન સાંખ્યેષુ યોગેષુ ચ મહાત્મસુ ॥ ૨૪૩.૧૯॥

યદેવ યોગાઃ પશ્યન્તિ સાંખ્યં તદનુગમ્યતે ।
એકં સાંખ્યાં ચ યોગં ચ યઃ યપશ્યતિ સ બુદ્ધિમાન્ ॥ ૨૪૩.૨૦॥

ત્વઙ્માંસં રુધિરં મેદઃ પિત્તં મજ્જાઽસ્થિ સ્નાયુ ચ ।
એતદૈન્દ્રિયકં તાત યદ્ભવાનિત્થમાત્થ મામ્ ॥ ૨૪૩.૨૧॥

દ્રવ્યાદ્દ્રવ્યસ્ય નિર્વૃત્તિરિન્દ્રિયાદિન્દ્રિયં તથા ।
દેહાદ્દેહમવાપ્નોતિ બીજાદ્બીજં તથૈવ ચ ॥ ૨૪૩.૨૨॥

નિરિન્દ્રિયસ્ય બીજસ્ય નિર્દ્રવ્યસ્યાપિ દેહિનઃ ।
કથં ગુણા ભવિષ્યન્તિ નિર્ગુણત્વાન્મહાત્મનઃ ॥ ૨૪૩.૨૩॥

ગુણા ગુણેષુ જાયન્તે તત્રૈવ વિરમન્તિ ચ ।
એવં ગુણાઃ પ્રકૃતિજા જાયન્તે ન ચ યાન્તિ ચ ॥ ૨૪૩.૨૪॥

ત્વઙ્માંસં રુધિરં મેદઃ પિત્તં મજ્જાઽસ્તિ સ્નાયુ ચ ।
અષ્ટૌ તાન્યથ શુક્રેણ જાનીહિ પ્રાકૃતેન વૈ ॥ ૨૪૩.૨૫॥

પુમાંશ્ચૈવાપુમાંસ્ચૈવ સ્ત્રીલિઙ્ગં પ્રાકૃતં સ્મૃતમ્ ।
વાયુરેષ પુમાંશ્ચૈવ રસ ઇત્યભિધીયતે ॥ ૨૪૩.૨૬॥

અલિઙ્ગા પ્રકૃતિર્લિઙ્ગૈરુપલભ્યતિ સાઽઽત્મજૈઃ ।
યથા પુષ્પફલૈર્નિત્યં મૂર્તં ચામૂર્તયસ્તથા ॥ ૨૪૩.૨૭॥

એવમપ્યનુમાનેન સ લિઙ્ગમુપલભ્યતે ।
પઞ્ચવિંશતિકસ્તાત લિઙ્ગેષુ નિયતાત્મકઃ ॥ ૨૪૩.૨૮॥

અનાદિનિધનોઽનન્તઃ સર્વદર્શનકેવલઃ ।
કેવલં ત્વભિમાનિત્વાદ્ગુણેષુ ગુણ ઉચ્યતે ॥ ૨૪૩.૨૯॥

ગુણા ગુણવતઃ સન્તિ નિર્ગુણસ્ય કુતો ગુણાઃ ।
તસ્માદેવં વિજાનન્તિ યે જના ગુણદર્શિનઃ ॥ ૨૪૩.૩૦॥

યદા ત્વેષ ગુણાનેતાન્પ્રાકૃતાનભિમન્યતે ।
તદા સ ગુણવાનેવ ગુણભેદાન્પ્રપશ્યતિ ॥ ૨૪૩.૩૧॥

યત્તદ્બુદ્ધેઃ પરં પ્રાહુઃ સાંખ્યયોગં ચ સર્વશઃ ।
બુધ્યમાનં મહાપ્રાજ્ઞાઃ પ્રબુદ્ધપરિવર્જનાત્ ॥ ૨૪૩.૩૨॥

અપ્રબુદ્ધં યથા વ્યક્તં સ્વગુણૈઃ પ્રાહુરીશ્વરમ્ ।
નિર્ગુણં ચેશ્વરં નિત્યમધિષ્ઠાતારમેવ ચ ॥ ૨૪૩.૩૩॥

પ્રકૃતેશ્ચ ગુણાનાં ચ પઞ્ચવિંશતિકં બુધાઃ ।
સાંખ્યયોગે ચ કુશલા બુધ્યન્તે પરમૈષિણઃ ॥ ૨૪૩.૩૪॥

યદા પ્રબુદ્ધમવ્યક્તમવસ્થાત(પ)નની(ભી)રવઃ ।
બુધ્યમાનં ન બુધ્યન્તેઽવગચ્છન્તિ સમં તદા ॥ ૨૪૩.૩૫॥

એતન્નદર્શનં સમ્યઙ્ન સમ્યગનુદર્શનમ્ ।
બુધ્યમાનં પ્રબુધ્યન્તે દ્વાભ્યાં પૃથગરિંદમ ॥ ૨૪૩.૩૬॥

પરસ્પરેણૈતદુક્તં ક્ષરાક્ષરનિદર્શનમ્ ।

એકત્વદર્શનં ચાસ્ય નાનાત્વં ચાસ્ય દર્શનમ્ ॥ ૨૪૩.૩૭॥

પઞ્ચવિંશતિનિષ્ઠોઽયં તદા સમ્યક્પ્રચક્ષતે ।
એકત્વદર્શનં ચાસ્ય નાનાત્વં ચાસ્ય દર્શનમ્ ॥ ૨૪૩.૩૮॥

તત્ત્વવિત્તત્ત્વયોરેવ પૃથગેતન્નિદર્શનમ્ ।
પઞ્ચવિંસતિભિસ્તત્ત્વં તત્ત્વમાહુર્મનીષિણઃ ॥ ૨૪૩.૩૯॥

નિસ્તત્ત્વં પઞ્ચવિંશસ્ય પરમાહુર્મષિણઃ ।
વર્જ્યસ્ય વર્જ્યમાચારં તત્ત્વં તત્ત્વાત્સનાતનમ્ ॥ ૨૪૩.૪૦॥

કરાલજનક ઉવાચ
નાનાત્વૈકત્વમિત્યુક્તં ત્વયૈતદ્દ્વિજસત્તમ ।
પશ્યતસ્તદ્ધિ સંદિગ્ધમેતયોર્વૈ નિદર્શનમ્ ॥ ૨૪૩.૪૧॥

તથા બુદ્ધપ્રબુદ્ધાભ્યાં બુધ્યમાનસ્ય ચાનઘ ।
સ્થૂલબુદ્ધ્યા ન પશ્યામિ તત્ત્વમેતન્ન સંશયઃ ॥ ૨૪૩.૪૨॥

અક્ષરક્ષરયોરુક્તં ત્વયા યદપિ કારણમ્ ।
તદપ્યસ્થિરબુદ્ધિત્વાત્પ્રનષ્ટમિવ મેઽનઘ ॥ ૨૪૩.૪૩॥

તદેતચ્છ્રોતુમિચ્છામિ નાનાત્વૈકત્વદર્શનમ્ ।
દ્વંદ્વં ચૈવાનિરુદ્ધં ચ બુધ્યમાનં ચ તત્ત્વતઃ ॥ ૨૪૩.૪૪॥

વિદ્યાવિદ્યે ચ ભગવન્નક્ષરં ક્ષરમેવ ચ ।
સાંખ્યયોગં ચ કૃત્સ્નેન બુદ્ધાબુદ્ધિં પૃથક્પૃથક્ ॥ ૨૪૩.૪૫॥

વસિષ્ઠ ઉવાચ
હન્ત તે સમ્પ્રવક્ષ્યામિ યદેતદનુપૃચ્છસિ ।
યોગકૃત્યં મહારાજ પૃથગેવ શૃણુષ્વ મે ॥ ૨૪૩.૪૬॥

યોગકૃત્યં તુ યોગાનાં ધ્યાનમેવ પરં બલમ્ ।
તચ્ચાપિ દ્વિવિધં ધ્યાનમાહુર્વિદ્યાવિદો જનાઃ ॥ ૨૪૩.૪૭॥

એકગ્રતા ચ મનસઃ પ્રાણાયામસ્તથૈવ ચ ।
પ્રાણાયામસ્તુ સગુણો નિર્ગુણો માનસસ્તથા ॥ ૨૪૩.૪૮॥

મૂત્રોત્સર્ગે પુરીષે ચ ભોજને ચ નરાધિપ(?) ।
દ્વિકાલં નોપભૃઞ્જીત શેષં ભુઞ્જીત તત્પરઃ ॥ ૨૪૩.૪૯॥

ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યો નિવર્ત્ય મનસા મુનિઃ ।
દશદ્વાદશભિર્વાઽપિ ચતુર્વિંશાત્પરં યતઃ ॥ ૨૪૩.૫૦॥

સ ચોદનાભિર્મતિમાન્નાત્માનં ચોદયેદથ ।
તિષ્ઠન્તમજરં તં તુ યત્તદુક્તં મનીષિભિઃ ॥ ૨૪૩.૫૧॥

વિશ્વાત્મા સતતં જ્ઞેય ઇત્યેવમનુસુશ્રુમ ।
દ્રવ્યં હ્યહીનમનસો નાન્યથેતિ વિનિશ્ચયઃ ॥ ૨૪૩.૫૨॥

વિમુક્તઃ સર્વસઙ્ગેભ્યો લવાહારો જિતેન્દ્રિયઃ ।
પૂર્વરાત્રે પાર્ધે ચ ધારયીત મનો હૃદિ ॥ ૨૪૩.૫૩॥

સ્થિરીકૃત્યેન્દ્રિયગ્રામં મનસા મિથિલેશ્વર ।
મનો બુદ્ધ્યા સ્થિરં કૃત્વા પાષાણ ઇવ નિશ્ચલઃ ॥ ૨૪૩.૫૪॥

સ્થાણુવચ્ચાપ્યકમ્પ્યઃ સ્યાદ્દારુવચ્ચાપિ નિશ્ચલઃ ।
બુદ્ધ્યા વિધિવિધાનજ્ઞાસ્તતો યુક્તં પ્રચક્ષતે ॥ ૨૪૩.૫૫॥

ન શૃણોતિ ન ચાઽઽઘ્રાતિ ન ચ પશ્યતિ કિંચન ।
ન ચ સપર્શં વિજાનાતિ ન ચ સંકલ્પતે મનઃ ॥ ૨૪૩.૫૬॥

ન ચાપિ મન્યતે કિંચિન્ન ચ બુધ્યેત કાષ્ઠવત્ ।
તદા પ્રકૃતિમાપન્નં યુક્તમાહુર્મનીષિણઃ ॥ ૨૪૩.૫૭॥

ન ભાતિ હિ યથા દીપો દીપ્તિસ્તદ્વચ્ચ દૃશ્યતે ।
નિલિઙ્ગસ્ચાધશ્ચોર્ધ્વં ચ તિર્યગ્ગતિમવાપ્નુયાત્ ॥ ૨૪૩.૫૮॥

તદા તદુપપન્નશ્ચ યસ્મિન્દૃષ્ટે ચ કથ્યતે ।
હૃદયસ્થોઽન્તરાત્મેતિ જ્ઞેયો જ્ઞસ્તાત મદ્વિધૈઃ ॥ ૨૪૩.૫૯॥

નિર્ધૂમ ઇવ સપ્તાર્ચિરાદિત્ય ઇવ રશ્મિવાન્ ।
વૈદ્યુતોઽગ્નિરિવાઽઽકાશે પસ્યત્યાત્માનમાત્મનિ ॥ ૨૪૩.૬૦॥

યં પસ્યન્તિ મહાત્માનો ધૃતિમન્તો મનીષિણઃ ।
બ્રાહ્મણા બ્રહ્મયોનિસ્થા હ્યયોનિમમૃતાત્મકમ્ ॥ ૨૪૩.૬૧॥

તદેવાઽઽહુરણુભ્યોઽણુ તન્મહદ્ભ્યો મહત્તરમ્ ।
સર્વત્ર સર્વભૂતેષુ ધ્રુવં તિષ્ઠન્ન દૃશ્યતે ॥ ૨૪૩.૬૨॥

બુદ્ધિદ્રવ્યેણ દૃશ્યેન મનોદીપેન લોકકૃત્ ।

મહતસ્તમસસ્તતાત પારે તિષ્ઠન્ન તામસઃ ॥ ૨૪૩.૬૩॥

તમસો દૂર ઇત્યુક્તસ્તત્ત્વજ્ઞૈર્વેદપારગૈઃ ।
વિમલો વિમતશ્ચૈવ નિર્લિઙ્ગોઽલિઙ્ગસંજ્ઞકઃ ॥ ૨૪૩.૬૪॥

યોગ એષ હિ લોકાનાં કિમન્યદ્યોગલક્ષણમ્ ।
એવં પશ્યન્પ્રપશ્યેન આત્માનમજરં પરમ્ ॥ ૨૪૩.૬૫॥

યોગદર્શનમેતાવદુક્તં તે તત્ત્વતો મયા ।
સાંખ્યજ્ઞાનં પ્રવક્ષ્યામિ પરિસંખ્યાનિદર્શનમ્ ॥ ૨૪૩.૬૬॥

અવ્યક્તમાહુઃ પ્રખ્યાનં પરાં પ્રકૃતિમાત્મનઃ ।
તસ્માન્મહાત્સમુત્પન્નં દ્વિતીયં રાજસત્તમ ॥ ૨૪૩.૬૭॥

અહંકારસ્તુ મહતસ્તૃતીય ઇતિ નઃ શ્રુતમ્ ।
પઞ્ચભૂતાન્યહંકારાદાહુઃ સાંખ્યાત્મદર્શિનઃ ॥ ૨૪૩.૬૮॥

એતાઃ પ્રકૃતયસ્ત્વષ્ટૌ વિકારાશ્ચાપિ ષોડશ ।
પઞ્ચ ચૈવ વિશેષાશ્ચ તથા પઞ્ચેન્દ્રિયાણિ ચ ॥ ૨૪૩.૬૯॥

એતાવદેવ તત્ત્વાનાં સાંખ્યમાહુર્મનીષિણઃ ।
સાંખ્યે સાંખ્યવિધાનજ્ઞા નિત્યં સાંખ્યપથે સ્થિતાઃ ॥ ૨૪૩.૭૦॥

યસ્માદ્યદભિજાયેત તત્તત્રૈવ પ્રલીયતે ।
લીયન્તે પ્રતિલોમાનિ ગૃહ્યન્તે ચાન્તરાત્મના ॥ ૨૪૩.૭૧॥

આનુલોમ્યેન જાયન્તે લીયન્તે પ્રતિલોમતઃ ।
ગુણા ગુણેષુ સતતં સાગરસ્યોર્મયો યથા ॥ ૨૪૩.૭૨॥

સર્ગપ્રલય એતાવાન્પ્રકૃતેર્નૃપસત્તમ ।
એકત્વં પ્રલયે ચાસ્ય બહુત્વં ચ તથા સૃજિ ॥ ૨૪૩.૭૩॥

એવમેવ ચ રાજેન્દ્ર વિજ્ઞેયં જ્ઞાનકોવિદૈઃ ।
અધિષ્ઠાતારમવ્યક્તમસ્યાપ્યેતન્નિદર્શનમ્ ॥ ૨૪૩.૭૪॥

એકત્વં ચ બહુત્વં ચ પ્રકૃતેરનુતત્ત્વવાન્ ।
એક્તાંવ પ્રલયે ચાસ્ય બહુત્વં ચ પ્રવર્તનાત્ ॥ ૨૪૩.૭૫॥

બહુલાઽઽત્મા રાજેન્દ્ર પ્રોચ્યતે યતિસત્તમૈઃ ।
અધિષ્ઠાનાદધિષ્ઠાતા ક્ષેત્રાણામિતિ નઃ શ્રુતમ્ ॥ ૨૪૩.૭૬॥

અધિષ્ઠાતેતિ રાજેન્દ્ર પ્રોચ્યતે યતિસત્તમૈઃ ।
અધિષ્ઠાનાદધિષ્ઠાતા ક્ષેત્રાણામિતિ નઃશ્રુતમ્ ॥ ૨૪૩.૭૭॥

ક્ષેત્રં જાનાતિ ચાવ્યક્તં ક્ષેત્રજ્ઞ ઇતિ ચોચ્યતે ।
અવ્યક્તિકે પુરે શેતે પુરુષશ્ચેતિ કથ્યતે ॥ ૨૪૩.૭૮॥

અન્યદેવ ચ ક્ષેત્રં સ્યાદન્યઃ ક્ષેત્રજ્ઞ ઉચ્યતે ।
ક્ષેત્રમવ્યક્ત ઇત્યુક્તં જ્ઞાતારં પઞ્ચવિંશકમ્ ॥ ૨૪૩.૭૯॥

અન્યદેવ ચ જ્ઞાનં સ્યાદન્યજ્જ્ઞેયં તદુચ્યતે ।
જ્ઞાનમવ્યક્તમિત્યુક્તં જ્ઞેયો વૈ પઞ્ચવિંશકમ્ ॥ ૨૪૩.૮૦॥

અવ્યક્તં ક્ષેત્રમિત્યુક્તં તથા સત્ત્વં તથેશ્વરમ્ ।
અનીશ્વરમતત્ત્વં ચ તત્ત્વં તત્પઞ્ચવિંશકમ્ ॥ ૨૪૩.૮૧॥

સાંક્યદર્શનમેતાવત્પરિસંખ્યા ન વિદ્યતે ।
સંખ્યાં પ્રકુરુતે ચૈવ પ્રકૃતિં ચ પ્રવક્ષ્યતે ॥ ૨૪૩.૮૨॥

ચત્વારિંશચ્ચતુર્વિંશત્પ્રતિસંખ્યાય તત્ત્વતઃ ।
સંખ્યા સહસ્રકૃત્યા તુ નિસ્તત્ત્વઃ પઞ્ચવિંશકઃ ॥ ૨૪૩.૮૩॥

પઞ્ચવિંશત્પ્રબુદ્ધાત્મા બુધ્યમાન ઇતિ શ્રુતઃ ।
યદા બુધ્યતિ આત્માનં તદા ભવતિ કેવલઃ ॥ ૨૪૩.૮૪॥

સમ્યગ્દર્શનમેતાવદ્ભાષિતં તવ તત્ત્વતઃ ।
એવમેતદ્વિજાનન્તઃ સામ્યતાં પ્રતિયાન્ત્યુત ॥ ૨૪૩.૮૫॥

સમ્યઙ્નિદર્શનં નામ પ્રત્યક્ષં પ્રકૃતેસ્તથા ।
ગુણવત્ત્વાદ્યથૈતાનિ નિર્ગુણેભ્યસ્તથા ભવેત્ ॥ ૨૪૩.૮૬॥

સમ્યઙ્નિદર્શનં નામ પ્રત્યક્ષં પ્રકૃતેસ્તથા ।
ગુણવત્ત્વાદ્યથૈતાનિ નિર્ગુણેભ્યસ્તથા ભવેત્ ॥ ૨૪૩.૮૭॥

પશ્યન્ત્યમતયો યે નચ સમ્યક્તેષુ ચ દર્શનમ્ ।
તે વ્યક્તિં પ્રતિપદ્યન્તે પુનઃ પુનરરિંદમ ॥ ૨૪૩.૮૮॥

સર્વમેતદ્વિજાનન્તો ન સર્વસ્ય પ્રબોધનાત્ ।
વ્યક્તિભૂતા ભવિષ્યન્તિ વ્યક્તસ્યૈવાનુવર્તનાત્ ॥ ૨૪૩.૮૯॥

સર્વમવ્યક્તમિત્યુક્તમસર્વઃ પઞ્ચવિંશકઃ ।
ય એવમભિજાનન્તિ ન ભયં તેષુ વિદ્યતે ॥ ૨૪૩.૯૦॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વસિષ્ઠકરાલજનકસંવાદે
ત્રિચત્વારિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૪૩॥

---

અધ્યાયઃ ૨૪૪ (૧૩૬)
વિદ્યાવિદ્યયોઃસ્વરૂપકથનમ્
વસિષ્ઠ ઉવાચ
સાંખ્યદર્શનમેતાવદુક્તં તે નૃપસત્તમ ।
વિદ્યાવિદ્યે ત્વિદાનીં મે ત્વં નિબોધાનુપૂર્વશઃ ॥ ૨૪૪.૧॥

અભેદ્યમાહુરવ્યક્તં સર્ગપ્રલયધર્મિણઃ ।
સર્ગપ્રલય ઇત્યુક્તં વિદ્યાવિદ્યે ચ વિંશકઃ ॥ ૨૪૪.૨॥

પરસ્પરસ્ય વિદ્યા વૈ તન્નિબોધાનુપૂર્વશઃ ।
યથોક્તમૃષિભિસ્તાત સાંખ્યસ્યાતિનિદર્શનમ્ ॥ ૨૪૪.૩॥

કર્મેન્દ્રિયાણાં સર્વેષાં વિદ્યા બુધ્દીન્દ્રિયં સ્મૃતમ્ ।
બુધ્દીન્દ્રિયાણાં ચ તથા વિશષા ઇતિ નઃ શ્રુતમ્ ॥ ૨૪૪.૪॥

વિષયાણાં મનસ્તેષાં વિદ્યામાહુર્મનીષિણઃ ।
મનસઃ પઞ્ચ ભૂતાનિ વિદ્યા ઇત્યભિચક્ષતે ॥ ૨૪૪.૫॥

અહંકારસ્તુ ભૂતાનાં પઞ્ચાનાં નાત્ર સંશયઃ ।
અહંકારસ્તથા વિદ્યા બુદ્ધિર્વિદ્યા નરેશ્વર ॥ ૨૪૪.૬॥

બુદ્ધ્યા પ્રકૃતિરવ્યક્તં તત્ત્વાનાં પરમેશ્વરઃ ।
વિદ્યા જ્ઞેયા નરશ્રેષ્ઠ વિધિશ્ચ પરમઃ સ્મૃતઃ ॥ ૨૪૪.૭॥

અવ્યક્તમપરં પ્રાહુર્વિદ્યા વૈ પઞ્ચવિંશકઃ ।
સર્વસ્ય સર્વમિત્યુક્તં જ્ઞેયજ્ઞાનસ્ય પારગઃ ॥ ૨૪૪.૮॥

જ્ઞાનમવ્યક્તમિત્યુક્તં જ્ઞેયં વૈ પઞ્ચવિંસકમ્ ।
તથૈવ જ્ઞાનમવ્યક્તં વિજ્ઞાતા પઞ્ચવિંશકઃ ॥ ૨૪૪.૯॥

વિદ્યાવિદ્યે તુ તત્ત્વેન મયોક્તે વૈ વિશેષતઃ ।

અક્ષરં ચ ક્ષરં ચૈવ યદુક્તં તન્નિબોધ મે ॥ ૨૪૪.૧૦॥

ઉભાવેતૌ ક્ષરાવુક્તૌ ઉભાવેતાવન(થા)ક્ષરૌ ।
કારણં તુ પ્રવક્ષ્યામિ યથાજ્ઞાનં તુ જ્ઞાનતઃ ॥ ૨૪૪.૧૧॥

અનાદિનિધનાવેતૌ ઉભાવેવેશ્વરૌ મતૌ ।
તત્ત્વસંજ્ઞાવુભાવેવ પ્રોચ્યતે જ્ઞાનચિન્તકૈઃ ॥ ૨૪૪.૧૨॥

સર્ગપ્રલયધર્મિત્વાદવ્યક્તં પ્રાહુરવ્યયમ્ ।
તદેતદ્ગુણસર્ગાય વિકુર્વાણં પુનઃ પુનઃ ॥ ૨૪૪.૧૩॥

ગુણાનાં મહદાદીનામુત્પદ્યતિ પરસ્પરમ્ ।
અધિષ્ઠાનં ક્ષેત્રમાહુરેતદ્વૈ પઞ્ચવિંશકમ્ ॥ ૨૪૪.૧૪॥

યદન્તર્ગુણજાલં તુ તદ્વ્યક્તાત્મનિ સંક્ષિપેત્ ।
તદહં તદ્ગુણૈસ્તસ્તુ પઞ્ચવિંશે વિલીયતે ॥ ૨૪૪.૧૫॥

ગુણા ગુણેષુ લીયન્તે તદેકા પ્રકૃતિર્ભવેત્ ।
ક્ષેત્રજ્ઞોઽપિ તદા તાવત્ક્ષેત્રજ્ઞઃ સમ્પ્રણીયતે ॥ ૨૪૪.૧૬॥

યદાઽક્ષરં પ્રકૃતિર્યં ગચ્છતે ગુણસંજ્ઞિતા ।
નિર્ગુણત્વં ચ વૈ દેહે ગુણેષુ પરિવર્તનાત્ ॥ ૨૪૪.૧૭॥

એવમેવ ચ ક્ષેત્રજ્ઞઃ ક્ષેત્રજ્ઞાનપરિક્ષયાત્ ।
પ્રકૃત્યા નિર્ગુણસ્ત્વેષ ઇત્યેવમનુશુશ્રુમ ॥ ૨૪૪.૧૮॥

ક્ષરો ભવત્યેષ યદા ગુણવતી ગુણેષ્વથ ।
પ્રકૃતિં ત્વથ જનાતિ નિર્ગુણત્વં તથાત્મનઃ ॥ ૨૪૪.૧૯॥

તથા વિશુદ્ધો ભવતિ પ્રકૃતે પરિવર્જનાત્ ।
અન્યોઽહમન્યેયમિતિ યદા બુધ્યતિ બુદ્ધિમાન્ ॥ ૨૪૪.૨૦॥

તદૈષોઽવ્યથતામેતિ ન ચ મિશ્રત્વમાવ્રજેત્ ।
પ્રકૃત્યા ચૈષ રાજેન્દ્ર મિશ્રોઽન્યોઽન્યસ્ય દૃશ્યતે ॥ ૨૪૪.૨૧॥

યદા તુ ગુણજાલં તત્પ્રાકૃતં વિજુગુપ્સતે ।
પશ્યતે ચ પરં પશ્યંસ્તદા પશ્યંસ્તદા પશ્યન્નુ સંસૃજેત્ ॥ ૨૪૪.૨૨॥

કિં મયા કૃતમેતાવદ્યોઽહં કાલનિમજ્જનઃ ।
યથા મત્સ્યો હ્યભિજ્ઞાનાદનુવર્તિતવાઞ્જલમ્ ॥ ૨૪૪.૨૩॥

અહમેવ હિ સંમોહાદન્યમન્યં જનાજ્જનમ્ ।
મત્સ્યો યથોદકજ્ઞાનાદનુવર્તિતવાનિહ ॥ ૨૪૪.૨૪॥

મત્સ્યોઽન્યત્વમથાજ્ઞાનાદુદકાન્નાભિમન્યતે ।
આત્માનં તદવજ્ઞાનાદન્યં ચૈવ ન વેદ્મ્યહમ્ ॥ ૨૪૪.૨૫॥

મમાસ્તુ ધિક્કુબુદ્ધસ્ય યોઽહં મગ્ન ઇમં પુનઃ ।
અનુવર્તિતવાન્મોહાદન્યમન્યં જનાજ્જનમ્ ॥ ૨૪૪.૨૬॥

અયમનુભવેદ્બન્ધુરનેન સહ મે ભયમ્ ।
સામ્યમેકત્વાતં યાતો યાદૃશસ્તાદૃશસ્ત્વહમ્ ॥ ૨૪૪.૨૭॥

તુલ્યતામિહ પશ્યામિ સદૃશોઽહમનેન વૈ ।
અયં હિ વિમલો વ્યક્તમહમીદૃશકસ્તદા ॥ ૨૪૪.૨૮॥

યોઽહમજ્ઞાનસંમોહાદજ્ઞયા સમ્પ્રવૃત્તવાન્ ।
સંસર્ગાદતિસંસર્ગાત્સ્થિતઃ કાલમિમં ત્વહમ્ ॥ ૨૪૪.૨૯॥

સોઽહમેવં વશીભૂતઃ કાલમેતં ન બુદ્ધવાન્ ।
ઉત્તમાધમમધ્યાનાં તામહં કથમાવસે ॥ ૨૪૪.૩૦॥

સમાનમાયયા ચેહ સહવાસમહં કથમ્ ।
ગચ્છામ્યબુદ્ધભાવત્વાદિહેદીનીં સ્થિરો વ ॥ ૨૪૪.૩૧॥

સહવાસં ન યાસ્યામિ કાલમેતં વિવઞ્ચનાત્ ।
વઞ્ચિતો હ્યનયા યદ્ધિ નિર્વિકારો વિકારયા ॥ ૨૪૪.૩૨॥

ન તત્તદપરાદ્ધં સ્યાદપરાધો હ્યયં મમ ।
યોઽહમત્રભવં સક્તઃ પરાઙ્મુખમુપસ્થિતઃ ॥ ૨૪૪.૩૩॥

તતોઽસ્મિન્બહુરૂપોઽથ સ્થિતો મૂર્તિરમૂર્તિમાન્ ।
અમૂર્તિશ્ચાપ્યમૂર્તાત્મા મમત્વેન પ્રધર્ષિતઃ ॥ ૨૪૪.૩૪॥

પ્રકૃત્યા ચ તયા તેન તાસુ તાસ્વિહ યોનિષુ ।
નિર્મમસ્ય મમત્વેન વિકૃતં તાસુ તાસુ ચ ॥ ૨૪૪.૩૫॥

યોનિષુ વર્તમાનેન નષ્ટસંજ્ઞેન ચેતસા ।
સમતા ન મયા કાચિદહંકારે કૃતા મયા ॥ ૨૪૪.૩૬॥

આત્માનં બહુધા કૃત્વા સોऽયં ભૂયો યુનક્તિ મામ્ ।
ઇદાનીમવબુદ્ધોऽસ્મિ નિર્મમો નિરહંકૃતઃ ॥ ૨૪૪.૩૭॥

મમત્વં મનસા નિત્યમહંકારકૃતાત્મકમ્ ।
અપલગ્નામિમાં હિત્વા સંશ્રયિષ્યે નિરામયમ્ ॥ ૨૪૪.૩૮॥

અનેન સામ્યં યાસ્યામિ નાનયાऽહમચેતસા ।
ક્ષેમં મમ સહાનેન નૈવૈકમનયા સહ ॥ ૨૪૪.૩૯॥

એવં પરમસંબોધાત્પઞ્ચવિંશોऽનુબુદ્ધવાન્ ।
અક્ષરત્વં નિગચ્છતિ ત્યક્ત્વા ક્ષરમનામયમ્ ॥ ૨૪૪.૪૦॥

અવ્યક્તં વ્યક્તધર્માણં સગુણં નિર્ગુણં તથા ।
નિર્ગુણં પ્રથમં દૃષ્ટ્વા તાદૃગ્ભવતિ મૈથિલ ॥ ૨૪૪.૪૧॥

અક્ષરક્ષરયોરેતદુક્તં તવ નિદર્શનમ્ ।
મયેહ જ્ઞાનસમ્પન્નં યથા શ્રુતિનિદ્રશનાત્ ॥ ૨૪૪.૪૨॥

નિઃસંદિગ્ધં ચ સૂક્ષ્મં ચ વિશુદ્ધં વિમલં તથા ।
પ્રવક્ષ્યામિ તુ તે ભૂયસ્તન્નિબોધ યથાશ્રુતમ્ ॥ ૨૪૪.૪૩॥

સાંખ્યયોગો મયા પ્રોક્તઃ શાસ્ત્રદ્વયનિદર્શનાત્ ।
યદેવ સાંક્યશાસ્ત્રોક્તં યોગદર્શનમેવ તત્ ॥ ૨૪૪.૪૪॥

પ્રબોધનપરં જ્ઞાનં સાંખ્યાનામવનીપતે ।
વિસ્પષ્ટં પ્રોચ્યતે તત્ર શિષ્યાણાં હિતકામ્યયા ॥ ૨૪૪.૪૫॥

બૃહચ્ચૈવમિદં શાસ્ત્રમિત્યાહુર્વિદુષો જનાઃ ।
અસ્મિંશ્ચ શાસ્ત્રે યોગાનાં પુનર્ભવપુરઃસરમ્ ॥ ૨૪૪.૪૬॥

પઞ્ચવિંશાત્પરં તત્ત્વં પઠ્યતે ચ નરાધિપ ।
સાંખ્યાનાં તુ પરં તત્ત્વં યથાવદનુવર્ણિતમ્ ॥ ૨૪૪.૪૭॥

બુદ્ધમપ્રતિબુદ્ધં ચ બુધ્યમાનં ચ તત્ત્વતઃ ।
બુધ્યમાનં ચ બુદ્ધત્વં પ્રાહુર્યોગનિદર્શનમ્ ॥ ૨૪૪.૪૮॥

બુદ્ધમપ્રતિબુદ્ધં ચ બુધ્યમાનં ચ તત્ત્વતઃ ।
બુધ્યમાનં ચ બુદ્ધત્વં પ્રાહુર્યોગનિદર્શનમ્ ॥ ૨૪૪.૪૯॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વસિષ્ઠકરાલજનકસંવાદે

ચતુશ્ચત્વારિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૪૪॥

અધ્યાયઃ ૨૪૫ (૧૩૭)

અજસ્યાપિ વિક્રિયયા નાનાભવનમ્

વસિષ્ઠ ઉવાચ

અપ્રબુદ્ધમથાવ્યક્તમિમં ગુણનિધિં સદા ।
ગુણાનાં ધાર્યતાં તત્ત્વં સૃજત્યાક્ષિપતે તથા ॥ ૨૪૫.૧॥

અજો હિ ક્રીડયા ભૂપ વિક્રિયાં પ્રાપ્ત ઇત્યુત ।
આત્માનં બહુધા કૃત્વા નાનેન પ્રતિચક્ષતે ॥ ૨૪૫.૨॥

એતદેવં વિકુર્વાણો બુધ્યમાનો ન બુધ્યતે ।
ગુણાનાચરતે હ્યેષ સૃજત્યાક્ષિપતે તથા ॥ ૨૪૫.૩॥

અવ્યક્તબોધનાચ્ચૈવ બુધ્યમાનં વદન્ત્યપિ ।
ન ત્વેવં બુધ્યતેઽવ્યક્તં સગુણં તાત નિર્ગુણમ્ ॥ ૨૪૫.૪॥

કદાચિત્ત્વેવ ખલ્વેતત્તદાહુઃ પ્રતિબુદ્ધકમ્ ।
બુધ્યતે યદિ ચાવ્યક્તમેતદ્વૈ પઞ્ચવિંશકમ્ ॥ ૨૪૫.૫॥

બુધ્યમાનો ભવત્યેષ મમાત્મક ઇતિ શ્રુતઃ ।
અન્યોન્યપ્રતિબુદ્ધેન વદન્ત્યવ્યક્તમચ્યુતમ્ ॥ ૨૪૫.૬॥

અવ્યક્તબોધનાચ્ચૈવ બુધ્યમાનં વદન્ત્યુત ।
પઞ્ચવિંશં મહાત્મનાં ન ચાસાવપિ બુધ્યતે ॥ ૨૪૫.૭॥

ષડ્વિંશં વિમલં બુદ્ધમપ્રમેયં મહાદ્યુતે ।
સતતં પઞ્ચવિંશં તુ ચતુર્વિંશં વિબુધ્યતે ॥ ૨૪૫.૮॥

દૃશ્યાદૃશ્યે હ્યનુગતતત્સ્વભાવે મહાદ્યુતે ।
અવ્યક્તં ચૈવ તદ્બ્રહ્મ બુધ્યતે તાત કેવલમ્ ॥ ૨૪૫.૯॥

પઞ્ચવિંશં ચતુર્વિંશમાત્માનમનુપશ્યતિ ।
બુધ્યમાનો યદાઽઽત્માનમન્યાઽહમિતિ મન્યતે ॥ ૨૪૫.૧૦॥

તદા પ્રકૃતિમાનેષ ભવત્યવ્યક્તલોચનઃ ।
બુધ્યતે ચ પરાં બુદ્ધિં વિશુદ્ધામમલાં યથા(દા) ॥ ૨૪૫.૧૧॥

ષડ્વિંશં રાજશાર્દૂલ તદા બુદ્ધઃ કૃતો વ્રજેત્ ।
તતસ્ત્યજતિ સોઽવ્યક્તસર્ગપ્રલયધર્મિણમ્ ॥ ૨૪૫.૧૨॥

નિર્ગુણાં પ્રકૃતિં વેદ ગુણયુક્તામચેતનામ્ ।
તતઃ કેવલધર્માઽસૌ ભવત્યવ્યક્તદર્શનાત્ ॥ ૨૪૫.૧૩॥

કેવલેન સમાગમ્ય વિમુક્તાત્માનમાપ્નુયાત્ ।
એતત્તુ તત્ત્વમિત્યાહુર્નિસ્તત્ત્વમજરામરમ્ ॥ ૨૪૫.૧૪॥

તત્ત્વસંશ્રવણાદેવ તત્ત્વજ્ઞો જાયતે નૃપ ।
પઞ્ચવિંશતિતત્ત્વાનિ પ્રવદન્તિ મનીષિણઃ ॥ ૨૪૫.૧૫॥

ન ચૈવ તત્ત્વવાંસ્તાત સંસારેષુ નિમજ્જતિ ।
એષામુપૈતિ તત્ત્વં હિ ક્ષિપ્રં બુધ્યસ્વ લક્ષણમ્ ॥ ૨૪૫.૧૬॥

ષડ્વિંશોઽયમિતિ પ્રાજ્ઞો ગૃહ્યમાણોઽજરામરઃ ।
કેવલેન બલેનૈવ સમતાં યાત્યસંશયમ્ ॥ ૨૪૫.૧૭॥

ષડ્વિંશેન પ્રબુદ્ધેન બુધ્યમાનોઽપ્યબુદ્ધિમાન્ ।
એતન્નાનાત્વમિત્યુક્તં સાંખ્યશ્રુતિનિદર્શનાત્ ॥ ૨૪૫.૧૮॥

ચેતનેન સમેતસ્ય પઞ્ચવિંશતિકસ્ય હ ।
એકત્વં વૈ ભવેત્તસ્ય યદા બુદ્ધ્યાઽનુબુધ્યતે ॥ ૨૪૫.૧૯॥

બુધ્યમાનેન બુદ્ધેન સમતાં યાતિ મૈતિલ ।
સઙ્ગધર્મા ભવત્યેષ નિઃસઙ્ગાત્મા નરાધિપ ॥ ૨૪૫.૨૦॥

નિઃસઙ્ગાત્માનમાસાદ્ય ષડ્વિંશં કર્મજ વિદુઃ ।
વિભુસ્ત્યજતિ ચાવ્યક્તં યદા ત્વેતદ્વિબુધ્યતે ॥ ૨૪૫.૨૧॥

ચતુર્વિંશમગાધં ચ ષડ્વિંશસ્ય પ્રબોધનાત્ ।
એષ હ્યપ્રતિબુદ્ધશ્ચ બુધ્યમાનસ્તુ તેઽનઘ ॥ ૨૪૫.૨૨॥

ઉક્તો બુદ્ધશ્ચ તત્ત્વેન યથાશ્રુતિનિદર્શનાત્ ।
મશકોદુમ્બરે યદ્વદન્યત્વં તદ્વદેતયોઃ(કતા) ॥ ૨૪૫.૨૩॥

મત્સ્યોદકં યથા તદ્વદન્યત્પમુપલભ્યતે ।
એવમેવ ચ ગન્તવ્યં નાનાત્વૈકત્વમેતયોઃ ॥ ૨૪૫.૨૪॥

એતાવન્મોક્ષ ઇત્યુક્તો જ્ઞાનવિજ્ઞાનસંજ્ઞિતઃ ।

પઞ્ચવિંશતિકસ્યાઽઽશુ યોઽયં દેહે પ્રવર્તતે ॥ ૨૪૫.૨૫॥

એષ મોક્ષયિતવ્યેતિ પ્રાહુરવ્યક્તગોચરાત્ ।
સોઽયમેવં વિમુચ્યેત નાન્યથેતિ વિનિશ્ચયઃ ॥ ૨૪૫.૨૬॥

પરશ્ચ પરધર્મા ચ ભવત્યેવ સમેત્ય વૈ ।
વિશુદ્ધધર્માશુદ્ધેન નાશુદ્ધેન ચ બુદ્ધિમાન્ ॥ ૨૪૫.૨૭॥

વિમુક્તધર્મા બુદ્ધેન સમેત્ય પુરુષર્ષભ ।
વિયોગધર્મિણા ચૈવ વિમુક્તાત્મા ભવત્યથ ॥ ૨૪૫.૨૮॥

વિમોક્ષિણા વિમોક્ષશ્ચ સમેત્યેહ તથા ભવેત્ ।
શુચિકર્મા શુચિશ્ચૈવ ભવત્યમિતબુદ્ધિમાન્ ॥ ૨૪૫.૨૯॥

વિમલાત્મા ચ ભવતિ સમેત્ય વિમલાત્મના ।
કેવલાત્મા તથા ચૈવ કેવલેન સમેત્ય વૈ॥

સ્વતન્ત્રશ્ચ સ્વતન્ત્રેણ સ્વતન્ત્રત્વમવાપ્યતે ॥ ૨૪૫.૩૦॥

એતાવદેતત્કથિતં મયા તે તથ્યં મહારાજ યથાર્થતત્ત્વમ્ ।
અમત્સરસ્ત્વં પ્રતિગૃહ્ય બુદ્ધ્યા, સનાતનં બ્રહ્મ વિશુદ્ધમાદ્યમ્ ॥ ૨૪૫.૩૧॥

તદ્વેદનિષ્ઠસ્ય જનસ્ય રાજન્, પ્રદેયમેતત્પરમં ત્વયા ભવેત્ ।
વિધિત્સામાનાય નિબોધકારકં, પ્રબોધહેતોઃ પ્રણતસ્ય શાસનમ્ ॥ ૨૪૫.૩૨॥

ન દેયમેતચ્ચ યથાઽનૃતાત્મને, શઠાય ક્લીબાય ન જિહ્મબુદ્ધયે ।
ન પણ્ડિતજ્ઞાનપરોપતાપિને, દેયં તથા શિષ્યવિબોધનાય ॥ ૨૪૫.૩૩॥

શ્રદ્ધાન્વિતાયાથ ગુણાન્વિતાય, પરાપવાદાદ્વિરતાય નિત્યમ્ ।
વિશુદ્ધયોગાય બુધાય ચૈવ, કૃપાવતેઽથ ક્ષમિણે હિતાય ॥ ૨૪૫.૩૪॥

વિવિક્તશીલાય વિધિપ્રિયયાય, વિવાદહીનાય બહુશ્રુતાય ।
વિનીતવેશાય નહૈતુકાત્મને, સદૈવ ગૃહ્યં ત્વિદમેવ દેયમ્ ॥ ૨૪૫.૩૫॥

એતૈર્ગુણૈર્હીનતમે ન દેયમેતત્પરં બ્રહ્મ વિશુદ્ધમાહુઃ ।
ન શ્રેયસે યોક્ષ્યતિ તાદૃશે કૃતં, ધર્મપ્રવક્તારમપાત્રદાનાત્ ॥ ૨૪૫.૩૬॥

પૃથ્વીમિમાં વા યદિ રત્નપૂર્ણાં,દદ્યાદદેયં ત્વિદમવ્રતાય ।
જિતેન્દ્રિયાય પ્રયતાય દેયં, દેયં પરં તત્ત્વવિદે નરેન્દ્ર ॥ ૨૪૫.૩૭॥

કરાલ મા તે ભયમસ્તિ કિંચિદેતચ્છ્રુતં બ્રહ્મ પરં ત્વયાઽદ્ય ।
યથાવદુક્તં પરમં વપિત્રં, વિશોકમત્યન્તમનાદિમધ્યમ્ ॥ ૨૪૫.૩૮॥

અગાધમેતદજરામરં ચ, નિરામયં વીતભયં શિવં ચ ।
સમીક્ષ્ય મોહં પરવાદસંજ્ઞમેતસ્ય તત્ત્વાર્થમિમં વિદિત્વા ॥ ૨૪૫.૩૯॥

અવાપ્તમેતદ્ધિ પુરા સનાતનાદ્ધિરણ્યગર્ભાદ્ધિ તતો નરાધિપ ।
પ્રસાદ્ય યત્નેન તમુગ્રતેજસં, સનાતનં બ્રહ્મ યથા ત્વયૈતત્ ॥ ૨૪૫.૪૦॥

પૃષ્ટસ્ત્વયા ચાઽસ્મિ યથા નરેન્દ્ર, તથા મયેદં ત્વયિ નોક્તમન્યત્ ।
યથાઽવાપ્તં બ્રહ્મણો મે નરેન્દ્ર, મહાજ્ઞાનં મોક્ષવિદાં પરાયણમ્ ॥ ૨૪૫.૪૧॥

એતદુક્તં પરં બ્રહ્મ યસ્માન્નાઽવર્તતે પુનઃ ।
પઞ્ચવિંશં મુનિશ્રેષ્ઠા વસિષ્ઠેન યથા પુરા ॥ ૨૪૫.૪૨॥

પુનરાવૃત્તિમાપ્નોતિ પરમં જ્ઞાનમવ્યયમ્ ।
નાતિ બુધ્યતિ તત્ત્વેન બુધ્યમાનોઽજરામરમ્ ॥ ૨૪૫.૪૩॥

એતન્નિઃશ્રેયસકરં જ્ઞાનં પરમં મયા ।
કથિતં તત્ત્વતો વિપ્રાઃ શ્રુત્વા દેવર્ષિતો દ્વિજાઃ ॥ ૨૪૫.૪૪॥

હિરણ્યગર્ભાદૃષિણા વસિષ્ઠેન સમાહૃતમ્ ।
વસિષ્ઠાદૃષિસાર્દૂલો નારદોઽવાપ્તવાનિદમ્ ॥ ૨૪૫.૪૫॥

નારદાદ્વિદિતં મહ્યમેતદુક્તં સનાતનમ્ ।
મા શુચધ્વં મુનિશ્રેષ્ઠાઃ શ્રુત્વૈતત્પરમં પદમ્ ॥ ૨૪૫.૪૬॥

યેન ક્ષરાક્ષરે ભિન્ને ન ભયં તસ્ય વિદ્યતે ।
વિદ્યતે તુ ભયં યસ્ય યો નૈનં વેત્તિ તત્ત્વતઃ ॥ ૨૪૫.૪૭॥

અવિજ્ઞાનાચ્ચ મૂઢાત્મા પુનઃ પુનરુપદ્રવાન્ ।
પ્રેત્ય જાતિસહસ્રાણિ મરણાન્તાન્યુપાશ્નુતે ॥ ૨૪૫.૪૮॥

દેવલોકં તથા તિર્યઙ્માનુષ્યમપિ ચાશ્નુતે ।
યદિ વા મુચ્યતે વાઽપિ તસ્માદજ્ઞાનસાગરાત્ ॥ ૨૪૫.૪૯॥

અજ્ઞાનસાગરે ઘોરે હ્યવ્યક્તાગાધ ઉચ્યતે ।
અહન્યહનિ મજ્જન્તિ યત્ર ભૂતાનિ ભો દ્વિજાઃ ॥ ૨૪૫.૫૦॥

તસ્માદગાધાદવ્યક્તાદુપક્ષીણાત્સનાતનાત્ ।

તસ્માદ્યુયં વિરજસકા વિતમસ્કાશ્ચ ભો દ્વિજાઃ ॥ ૨૪૫.૫૧॥

એવં મયા મુનિશ્રેષ્ઠાઃ સારાત્સારતરં પરમ્ ।
કથિતં પરમં મોક્ષં યં જ્ઞાત્વા ન નિવર્તતે ॥ ૨૪૫.૫૨॥

ન નાસ્તિકાય દાતવ્ય નાભક્તાય કદાચન ।
ન દુષ્ટમતયે વિપ્રા ન શ્રદ્ધાવિમુખાય ચ ॥ ૨૪૫.૫૩॥

ઇતિ શ્રીમહાપુરાણે આદિબ્રાહ્મે વસિષ્ઠકરાલજનકસંવાદસમાપ્તિનિરૂપણં નામ
પઞ્ચત્વારિંશદધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૪૫॥

adhyAya numbering is different with gautamI mAhAtmya with 105 adhyAyas are inserted from 70th adhyAya in the encoding.
Compare with adhyAya 126-137 in the printed book
https://archive.org/details/BrahmaPurana
are given as 234-245 above.

---

.. Vyasagita from Brahma Purana ..
Searchable pdf was typeset using generateactualtext feature of XeLaTeX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*